ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

(वाक्य सहित)

पञ्चमकाण्डे द्वितीयः प्रश्नः

Notes:

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

Version 0.0 **January 31, 2019**

Table of Contents

5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमं काण्डं 3

5.2 पञ्चमकाण्डे द्वितीयः प्रश्नः – चित्युपक्रमाभिधानं... 3

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः , हरिः ओं

5 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे पञ्चमं काण्डं

5.2 पञ्चमकाण्डे द्वितीयः प्रश्नः – चित्युपक्रमाभिधानं

5.2.1.1

विष्णुमुखा वै देवाः छन्दोभिरिमान् ँल्लोकाननपजय्य मभ्यजयन्
यद्–विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमानः छन्दोभिरिमान्
ँल्लोकाननपजय्यमभि जयति विष्णोः क्रमोऽस्य–भिमातिहेत्याह
गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिशः
छन्दोभिरेवेमान् ँल्लोकान् यथा पूर्वमभि जयति प्रजापतिरग्निमसृजत
सोऽस्माथ् सृष्टः – [ ] 1

5.2.1.1 - Padam

विष्णुमुखा इति विष्णु – मुखाः । वै । देवाः । छन्दोभिरिति छन्दः – भिः । इमान् । लोकान् । अनपजय्यमित्यनप – जय्यम् । अभीति । अजयन्न् । यत् । विष्णुक्रमानिति विष्णु–क्रमान् । क्रमते । विष्णुः । एव । भूत्वा । यजमानः । छन्दोभिरिति छन्दः – भिः । इमान् । लोकान् । अनपजय्यमित्यनप–जय्यम् । अभीति । जयति । विष्णोः । क्रमः । असि । अभिमातिहेत्यभिमाति–हा । इति । आह । गायत्री । वै । पृथिवी । त्रैष्टुभम् । अन्तरिक्षम् । जागती । द्यौः । आनुष्टुभीरित्यानु – स्तुभीः । दिशः । छन्दोभिरिति छन्दः – भिः । एव । इमान् । लोकान् । यथापूर्वमिति यथा – पूर्वम् । अभीति । जयति । प्रजापतिरिति प्रजा – पतिः । अग्निम् । असृजत । सः । अस्मात् । सृष्टः । **1 (50)**

5.2.1.2

पराङैत् तमेतया ऽन्वैदक्रन्दतिति तया वै सोऽग्नेः प्रियं धामाऽवारुन्ध यदेतामन्वाहा–ग्नेरेवैतया प्रियं धामाऽव रुन्ध ईश्वरो वा एष पराङ्

प्रदघो यो विष्णुक्रमान् क्रमते चतसृभिरा वर्तते चत्वारि छन्दा॑ꣳसि
छन्दा॑ꣳसि खलु वा अग्नेः प्रिया तनूः प्रियामेवास्य तनुवमभि–[] **2**

5.2.1.2 - Padam

पराङ् । ऐत् । तम् । एतया । अन्विति । ऐत् । अक्रन्दत् । इति ।
तया । वै । सः । अग्नेः । प्रियम् । धाम । अवेति । अरुन्ध । यत् ।
एताम् । अन्वाहेत्यनु–आह । अग्नेः । एव । एतया । प्रियम् । धाम ।
अवेति । रुन्धे । ईश्वरः । वै । एषः । पराङ् । प्रदघ इति प्र –दघः ।
यः । विष्णुक्रमानिति विष्णु – क्रमान् । क्रमते । चतसृभिरिति
चतसृ – भिः । एति । वर्तते । चत्वारि । छन्दा॑ꣳसि । छन्दा॑ꣳसि ।
खलु । वै । अग्नेः । प्रिया । तनूः । प्रियाम् । एव । अस्य ।
तनुवम् । अभीति । **2 (50)**

5.2.1.3

पर्यावर्तते दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद्–
दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽ*वृतमनु पर्यावर्तते

शुनः शेपमाजीगर्तिं वरुणोऽगृह्णाथ् स एतां ँवारुणीमपश्यत् तया वै स आत्मानं ँवरुणपाशादमुञ्चद्-वरुणो वा एतं गृह्णाति य उखां प्रतिमुञ्चत उदुत्तमं ँवरुणपाश-मस्मदित्याहा-ऽऽ*त्मानमेवैतया-[] 3

5.2.1.3 - Padam

पर्यावर्तत इति परि - आवर्तते । दक्षिणा । पर्यावर्तत इति परि - आवर्तते । स्वम् । एव । वीर्यम् । अन्विति । पर्यावर्तत इति परि - आवर्तते । तस्मात् । दक्षिणः । अर्धः । आत्मनः । वीर्यावत्तर इति वीर्यावत् - तरः । अथो इति । आदित्यस्य । एव । आवृतमित्या - वृतम् । अन्विति । पर्यावर्तत इति परि - आवर्तते । शुनः शेपम् । आजीगर्तिम् । वरुणः । अगृह्णात् । सः । एताम् । वारुणीम् । अपश्यत् । तया । वै । सः । आत्मानम् । वरुणपाशादिति वरुण - पाशात् । अमुञ्चत् । वरुणः । वै । एतम् । गृह्णाति । यः । उखाम् । प्रतिमुञ्चत इति प्रति - मुञ्चते । उदिति । उत्तममित्युत् - तमम् । वरुण । पाशम् । अस्मत् । इति । आह ।

आत्मानम् । एव । एतया । **3 (50)**

5.2.1.4

वरुणपाशान् मुञ्चत्या त्वाऽ*हार्.षमित्याहा ऽऽ*ह्येन७ँ् हरति ध्रुवस्तिष्ठा ऽविचाचलिरित्याह प्रतिष्ठित्यै विशस्त्वा सर्वा वाञ्छन्त्वित्याह विशैवैन७ँ् समर्धयत्यस्मिन् राष्ट्रमधि श्रयेत्याह राष्ट्रमेवास्मिन् ध्रुवमकर्यं कामयेत राष्ट्र७ स्यादिति तं मनसा ध्यायेद्–राष्ट्रमेव भवत्य– [ ] **4**

5.2.1.4 - Padam

वरुणपाशादिति वरुण–पाशात् । मुञ्चति । एति । त्वा । अहार्.षम् । इति । आह । एति । हि । एनम् । हरति । ध्रुवः । तिष्ठ । अविचाचलिरित्यवि – चाचलिः । इति । आह । प्रतिष्ठित्या इति प्रति – स्थित्यै । विशः । त्वा । सर्वाः । वाञ्छन्तु । इति । आह । विशा । एव । एनम् । समिति । अर्धयति । अस्मिन्न् । राष्ट्रम् । अधीति । श्रय । इति । आह । राष्ट्रम् । एव । अस्मिन्न् । ध्रुवम् । अकः । यम् । कामयेत । राष्ट्रम् । स्यात् । इति । तम् । मनसा । ध्यायेत् । राष्ट्रम् । एव । भवति । **4 (50)**

5.2.1.5

-ग्रे बृहन्नुषसामूर्ध्वो अस्थादित्याहाऽग्रमेवैनꣳ समानानां करोति निर्जग्मिवान् तमस इत्याह तम एवास्मादप हन्ति ज्योतिषा-ऽऽगादित्याह ज्योतिरेवा-स्मिन् दधाति चतसृभिः सादयति चत्वारि छन्दाꣳसि छन्दोभिरेवाऽ-तिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मैवैनꣳ समानानां करोति सद्वती - [ ] **5**

5.2.1.5 - Padam

अग्रे । बृहन्न् । उषसाम् । ऊर्ध्वः । अस्थात् । इति । आह । अग्रम् । एव । एनम् । समानानाम् । करोति । निर्जग्मिवानिति निः-जग्मिवान् । तमसः । इति । आह । तमः । एव । अस्मात् । अपेति । हन्ति । ज्योतिषा । एति । अगात् । इति । आह । ज्योतिः । एव । अस्मिन्न् । दधाति । चतसृभिरिति चतसृ - भिः । सादयति । चत्वारि । छन्दाꣳसि । छन्दोभिरिति छन्दः - भिः । एव । अतिच्छन्दसेत्यति - छन्दसा । उत्तमयेत्युत् - तमया । वर्ष्म । वै ।

एषा । छन्दसाम् । यत् । अतिच्छन्दा इत्यति – छन्दाः । वर्ष्म । एव ।
एनम् । समानानाम् । करोति । सद्वतीति सत् – वती । **5 (50)**

5.2.1.6

भवति सत्त्वमेवैनं गमयति वाथ्सप्रेणोप तिष्ठत एतेन वै
वथ्सप्रीर्भालन्दनोऽग्नेः प्रियं धामाऽवाऽरुन्धाऽग्नेरेवैतेन प्रियं धामाऽव
रुन्ध एकादशं भवत्येकधैव यजमाने वीर्यं दधाति स्तोमेन वै देवा
अस्मिन् ँल्लोक आर्ध्नुवन् छन्दोभिरमुष्मिन्थ् स्तोमस्येव खलु वा
एतद्–रूपं ँयद्–वाथ्सप्रं ँयद्–वाथ्सप्रेणोपतिष्ठत– [ ] **6**

5.2.1.6 - Padam

भवति । सत्त्वमिति सत् – त्वम् । एव । एनम् । गमयति ।
वाथ्सप्रेणेति वाथ्स – प्रेण । उपेति । तिष्ठते । एतेन । वै ।
वथ्सप्रीरिति वथ्स – प्रीः । भालन्दनः । अग्नेः । प्रियम् । धाम ।
अवेति । अरुन्ध । अग्नेः । एव । एतेन । प्रियम् । धाम । अवेति ।
रुन्धे । एकादशम् । भवति । एकधेत्येक – धा । एव । यजमाने ।
वीर्यम् । दधाति । स्तोमेन । वै । देवाः । अस्मिन्न् । लोके ।

आर्ध्नुवन्न् । छन्दोभिरिति छन्दः – भिः । अमुष्मिन्न् । स्तोमस्य ।
इव । खलु । वै । एतत् । रूपम् । यत् । वाथ्सप्रमिति वाथ्स–प्रम् ।
यत् । वाथ्सप्रेणेति वाथ्स–प्रेण । उपतिष्ठत इत्युप–तिष्ठते । **6 (50)**

5.2.1.7

इममेव तेन लोकमभि जयति यद्–विष्णुक्रमान् क्रमतेऽमुमेव
तैर्लोकमभि जयति पूर्वेद्युः प्रक्रामत्युत्तरेद्युरुप तिष्ठते तस्माद्–
योगेऽन्यासां प्रजानां मनः क्षेमेऽन्यासां तस्माद्–यायावरः क्षेम्यस्येशे
तस्माद्–यायावरः क्षेम्यमध्यवस्यति मुष्टी करोति वाचं यँच्छति
यज्ञस्य धृत्यै । **7**

5.2.1.7 - Padam

इमम् । एव । तेन । लोकम् । अभीति । जयति । यत् ।
विष्णुक्रमानिति विष्णु – क्रमान् । क्रमते । अमुम् । एव । तैः ।
लोकम् । अभीति । जयति । पूर्वेद्युः । प्रेति । क्रामति । उत्तरेद्युः ।
उपेति । तिष्ठते । तस्मात् । योगे । अन्यासाम् । प्रजानामिति
प्र – जानाम् । मनः । क्षेमे । अन्यासाम् । तस्मात् । यायावरः ।

क्षेम्यस्य । ईशे । तस्मात् । यायावरः । क्षेम्यम् । अध्यवस्यतीत्यधि - अवस्यति । मुष्टी इति । करोति । वाचम् । यच्छति । यज्ञस्य । धृत्यै । **7 (42)** *(सृष्टोऽ - (1) भ्ये - तया - भवति - सद्वत्यु - पतिष्ठते - द्विचत्वारिꣳशच्च) (A1)*

5.2.2.1

अन्नपतेऽन्नस्य नो देहीत्याहा-ग्निर्वा अन्नपतिः स एवास्मा अन्नं प्रयच्छत्यनमीवस्य शुष्मिण इत्याहा-यक्ष्मस्येति वावैतदाह प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याहाऽऽ*शिषमेवैतामा शास्त उदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः- [ ] **8**

5.2.2.1 - Padam

अन्नपत इत्यन्न - पते । अन्नस्य । नः । देहि । इति । आह । अग्निः । वै । अन्नपतिरित्यन्न - पतिः । सः । एव । अस्मै । अन्नम् । प्रेति । यच्छति । अनमीवस्य । शुष्मिणः । इति । आह । अयक्ष्मस्य । इति । वाव । एतत् । आह । प्रेति । प्रदातारमिति प्र - दातारम् । तारिषः । ऊर्जम् । नः । धेहि ।

द्विपद इति द्वि – पदे । चतुष्पद इति चतुः – पदे । इति । आह । आशिषमित्या – शिषम् । एव । एताम् । एति । शास्ते । उदिति । उ । त्वा । विश्वे । देवाः । इति । आह । प्राणा इति प्र–अनाः । वै । विश्वे । देवाः । 8 (50)

5.2.2.2

प्राणैरेवैनमुद्यच्छते ऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैन॒ँ समर्धयति चतसृभिरा सादयति चत्वारि छन्दा॒ँसि छन्दोभिरेवा–तिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मैवैन॒ँ समानानां करोति सद्वती भवति सत्त्वमेवैनं गमयति प्रेदग्ने ज्योतिष्मान्– [ ] 9

5.2.2.2 - Padam

प्राणैरिति प्र – अनैः । एव । एनम् । उदिति । यच्छते । अग्ने । भरन्तु । चित्तिभिरिति चित्ति – भिः । इति । आह । यस्मै । एव । एनम् । चित्ताय । उद्यच्छत इत्युत् – यच्छते । तेन । एव । एनम् । समिति । अर्धयति । चतसृभिरिति चतसृ – भिः । एति । सादयति ।

चत्वारि । छन्दा॑ꣳसि । छन्दोभिरिति छन्दः – भिः । एव ।
अतिच्छन्दसेत्यति – छन्दसा । उत्तमयेत्युत् – तमया । वर्ष्म । वै ।
एषा । छन्दसाम् । यत् । अतिच्छन्दा इत्यति – छन्दाः । वर्ष्म । एव ।
एनम् । समानानाम् । करोति । सद्वतीति सत् – वती । भवति ।
सत्त्वमिति सत्–त्वम् । एव । एनम् । गमयति । प्रेति । इत् । अग्ने ।
ज्योतिष्मान् **| 9 (50)**

5.2.2.3

याहीत्याह ज्योतिरेवास्मिन् दधाति तनुवा वा एष हिनस्ति यꣳ
हिनस्ति मा हिꣳसीस्तनुवा प्रजा इत्याह प्रजाभ्य एवैनꣳ शमयति
रक्षाꣳसि वा एतद्–यज्ञꣳ सचन्ते यदन उथ्सर्ज–त्यक्रन्ददित्यन्वाह
रक्षसामपहत्या अनसा वहन्–त्यपचिति–मेवास्मिन् दधाति
तस्मादनस्वी च रथी चातिथीना–मपचिततमा – [ ] **10**

5.2.2.3 - Padam

याहि । इति । आह । ज्योतिः । एव । अस्मिन्न् । दधाति । तनुवा ।
वै । एषः । हिनस्ति । यम् । हिनस्ति । मा । हिꣳसीः । तनुवा ।

प्रजा इति प्र – जाः । इति । आह । प्रजाभ्य इति प्र – जाभ्यः ।

एव । एनम् । शमयति । रक्षाꣳसि । वै । एतत् । यज्ञम् । सचन्ते ।

यत् । अनः । उथ्सर्जतीत्युत्–सर्जति । अक्रन्दत् । इति । अन्विति ।

आह । रक्षसाम् । अपहत्या इत्यप – हत्यै । अनसा । वहन्ति ।

अपचितिमित्यप – चितिम् । एव । अस्मिन्न् । दधाति । तस्मात् ।

अनस्वी । च । रथी । च । अतिथीनाम् ।

अपचिततमावित्यपचित – तमौ । **10 (50)**

5.2.2.4

वपचितिमान् भवति य एवं वेद समिधाऽग्निं दुवस्यतेति

घृतानुषिक्तामवसिते समिधमा दधाति यथाऽतिथय आगताय

सर्पिष्वदातिथ्यं क्रियते तादृगेव तद्–गायत्रिया ब्राह्मणस्य गायत्रो हि

ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यो ऽफ्सु भस्म प्र

वेशयत्यफ्सुयोनिर्वा अग्निः स्वामेवैनं योनिं गमयति तिसृभिः

प्रवेशयति त्रिवृद्वा – [ ] 11

5.2.2.4 - Padam

अपचितिमानित्यपचिति – मान् । भवति । यः । एवम् । वेद ।
समिधेति सं – इधा । अग्निम् । दुवस्यत । इति । घृतानुषिक्तामिति
घृत – अनुषिक्ताम् । अवसित इत्यव – सिते । समिधमिति
सं – इधम् । एति । दधाति । यथा । अतिथये । आगतायेत्या
– गताय । सर्पिष्वत् । आतिथ्यम् । क्रियते । तादृक् । एव । तत् ।
गायत्रिया । ब्राह्मणस्य । गायत्रः । हि । ब्राह्मणः । त्रिष्टुभा ।
राजन्यस्य । त्रैष्टुभः । हि । राजन्यः । अफ्स्वित्यप्–सु । भस्म ।
प्रेति । वेशयति । अफ्सुयोनिरितियफ्सु – योनिः । वै । अग्निः ।
स्वाम् । एव । एनम् । योनिम् । गमयति । तिसृभिरिति तिसृ–भिः ।
प्रेति । वेशयति । त्रिवृदिति त्रि – वृत् । वै । **11 (50)**

5.2.2.5

अग्नि–र्यावानेवाऽग्निस्तं प्रतिष्ठां गमयति परा वा एषोऽग्निं
ँवपति योऽफ्सु भस्म प्रवेशयति ज्योतिष्मतीभ्या–मव दधाति
ज्योतिरेवाऽस्मिन् दधाति द्वाभ्यां प्रतिष्ठित्यै परा वा एष प्रजां पशून्

वपति योऽफ्सु भस्म प्रवेशयति पुनरूर्जा सह रय्येति पुनरुदैति
प्रजामेव पशूनात्मन् धत्ते पुनस्त्वाऽऽदित्या– [ ] **12**

5.2.2.5 - Padam

अग्निः । यावान् । एव । अग्निः । तम् । प्रतिष्ठामिति प्रति – स्थाम् ।
गमयति । परेति । वै । एषः । अग्निम् । वपति । यः । अफ्स्वित्यप्
– सु । भस्म । प्रवेशयतीति प्र – वेशयति । ज्योतिष्मतीभ्याम् ।
अवेति । दधाति । ज्योतिः । एव । अस्मिन्न् । दधाति । द्वाभ्याम् ।
प्रतिष्ठित्या इति प्रति – स्थित्यै । परेति । वै । एषः । प्रजामिति
प्र – जाम् । पशून् । वपति । यः । अफ्स्वित्यप् – सु । भस्म ।
प्रवेशयतीति प्र – वेशयति । पुनः । ऊर्जा । सह । रय्या । इति ।
पुनः । उदैतीत्युत् – ऐति । प्रजामिति प्र – जाम् । एव । पशून् ।
आत्मन्न् । धत्ते । पुनः । त्वा । आदित्याः । **12 (50)**

5.2.2.6

रुद्रा वसवः समिन्धता–मित्याहैता वा एतं देवता अग्रे समैन्धत
ताभिरेवैन॑ समिन्धे बोधा स बोधीत्युप तिष्ठते बोधयत्येवैनं

तस्माथ् सुप्त्वा प्रजाः प्रबुध्यन्ते यथास्थानमुप तिष्ठते तस्माद्-
यथास्थानं पशवः पुनरेत्योप तिष्ठन्ते । **13**

5.2.2.6 - Padam

रुद्राः । वसवः । समिति । इन्धताम् । इति । आह । एताः । वै ।
एतम् । देवताः । अग्रे । समिति । ऐन्धत । ताभिः । एव । एनम् ।
समिति । इन्धे । बोध । सः । बोधि । इति । उपेति । तिष्ठते ।
बोधयति । एव । एनम् । तस्मात् । सुप्त्वा । प्रजा इति प्र – जाः ।
प्रेति । बुध्यन्ते । यथास्थानमिति यथा – स्थानम् । उपेति । तिष्ठते ।
तस्मात् । यथास्थानमिति यथा – स्थानम् । पशवः । पुनः ।
एत्येत्या – इत्य । उपेति । तिष्ठन्ते । **13 (42)**

(वै विश्वे देवा – ज्योतिष्मा – नपचिततमौ – त्रिवृद्वा – आदित्या – द्विचत्वारिꣳशच्च) (A2)

5.2.3.1

यावती वै पृथिवी तस्यै यम आधिपत्यं परीयाय यो वै यमं
देवयजनमस्या अनिर्याच्याऽग्निं चिनुते यमायैनꣳ

स चिनुतेऽपेते-त्यध्यवसाययति यममेव देवयजनमस्यै निर्याच्या-ऽऽत्मनेऽग्निं चिनुत इष्वग्रेण वा अस्या अनामृत-मिच्छन्तो नाविन्दन् ते देवा एतद्-यजुरपश्यन्नपेतेति यदेतेना-ध्यवसाययत्य - [ ] **14**

5.2.3.1 - Padam

यावती । वै । पृथिवी । तस्यै । यमः । आधिपत्यमित्याधि - पत्यम् । परीति । इयाय । यः । वै । यमम् । देवयजनमिति देव - यजनम् । अस्याः । अनिर्याच्येत्यनिः - याच्य । अग्निम् । चिनुते । यमाय । एनम् । सः । चिनुते । अपेति । इत । इति । अध्यवसाययतीत्यधि - अवसाययति । यमम् । एव । देवयजनमिति देव-यजनम् । अस्यै । निर्याच्येति निः - याच्य । आत्मने । अग्निम् । चिनुते । इष्वग्रेणेतीषु - अग्रेण । वै । अस्याः । अनामृतमित्यना - मृतम् । इच्छन्तः । न । अविन्दन्न् । ते । देवाः । एतत् । यजुः । अपश्यन्न् । अपेति । इत । इति । यत् । एतेन । अध्यवसाययतीत्यधि - अवसाययति । **14 (50)**

5.2.3.2

–नामृत एवाग्निं चिनुत उद्धन्ति यदेवास्या अमेध्यं तदप

हन्त्यपोऽवोक्षति शान्त्यै सिकता नि वपत्येतद्वा अग्नेर्वैश्वानरस्य

रूप७ं रूपेणैव वैश्वानरमव रुन्ध ऊषान् निवपति पुष्टिर्वा एषा

प्रजननं ँयदूषाः पुष्ट्यामेव प्रजननेऽग्निं चिनुतेऽथो संज्ञान एव

संज्ञान७ं ह्येतत् – [ ] **15**

5.2.3.2 - Padam

अनामृत इत्यना – मृते । एव । अग्निम् । चिनुते । उदिति । हन्ति ।

यत् । एव । अस्याः । अमेध्यम् । तत् । अपेति । हन्ति । अपः ।

अवेति । उक्षति । शान्त्यै । सिकताः । नीति । वपति । एतत् । वै ।

अग्नेः । वैश्वानरस्य । रूपम् । रूपेण । एव । वैश्वानरम् । अवेति ।

रुन्धे । ऊषान् । नीति । वपति । पुष्टिः । वै । एषा । प्रजननमिति

प्र – जननम् । यत् । ऊषाः । पुष्ट्याम् । एव । प्रजनन इति

प्र – जनने । अग्निम् । चिनुते । अथो इति । संज्ञान इति

सं – ज्ञाने । एव । संज्ञानमिति सं–ज्ञानम् । हि । एतत् । **15 (50)**

5.2.3.3

पशूनां ँयदूषा द्यावापृथिवी सहाऽऽस्तां ते वियती अब्रूतामस्त्वेव नौ सह यज्ञियमिति यदमुष्या यज्ञियमासीत् तदस्यामदधात् त ऊषा अभवन् यदस्या यज्ञियमासीत् तदमुष्यामदधात् तददश्चन्द्रमसि कृष्णमूषान् निवपन्नदो ध्यायेद् द्यावापृथिव्योरेव यज्ञियेऽग्निं चिनुते ऽयऌ सो अग्निरिति विश्वामित्रस्य – [ ] **16**

5.2.3.3 - Padam

पशूनाम् । यत् । ऊषाः । द्यावापृथिवी इति द्यावा – पृथिवी । सह । आस्ताम् । ते इति । वियती इति वि – यती । अब्रूताम् । अस्तु । एव । नौ । सह । यज्ञियम् । इति । यत् । अमुष्याः । यज्ञियम् । आसीत् । तत् । अस्याम् । अदधात् । ते । ऊषाः । अभवन्न् । यत् । अस्याः । यज्ञियम् । आसीत् । तत् । अमुष्याम् । अदधात् । तत् । अदः । चन्द्रमसि । कृष्णम् । ऊषान् । निवपन्निति नि–वपन्न् । अदः । ध्यायेत् । द्यावापृथिव्योरिति द्यावा – पृथिव्योः । एव ।

यज्ञिये । अग्निम् । चिनुते । अयम् । सः । अग्निः । इति ।
विश्वामित्रस्येति विश्व - मित्रस्य । **16 (50)**

5.2.3.4

सूक्तं भवत्येतेन वै विश्वामित्रोऽग्नेः प्रियं धामा ऽवारुन्धाग्नेरेवैतेन प्रियं धामाव रुन्धे छन्दोभिर्वै देवाः सुवर्गं ँलोकमायन् चतस्रः प्राचीरुप दधाति चत्वारि छन्दा॒ꣳसि छन्दोभिरेव तद्-यजमानः सुवर्गं ँलोकमेति तेषा॒ꣳ सुवर्गं ँलोकं ँयतां दिशः समव्लीयन्त ते द्वे पुरस्ताथ् समीची उपादधत द्वे - [ ] **17**

5.2.3.4 - Padam

सूक्तमिति सु - उक्तम् । भवति । एतेन । वै । विश्वामित्र इति विश्व - मित्रः । अग्नेः । प्रियम् । धाम । अवेति । अरुन्ध । अग्नेः । एव । एतेन । प्रियम् । धाम । अवेति । रुन्धे । छन्दोभिरिति छन्दः - भिः । वै । देवाः । सुवर्गमिति सुवः - गम् । लोकम् । आयन्न् । चतस्रः । प्राचीः । उपेति । दधाति । चत्वारि । छन्दा॒ꣳसि । छन्दोभिरिति छन्दः - भिः । एव । तत् । यजमानः । सुवर्गमिति

सुवः - गम् । लोकम् । एति । तेषाम् । सुवर्गमिति सुवः - गम् ।
लोकम् । यताम् । दिशः । समिति । अव्लीयन्त । ते । द्वे इति ।
पुरस्तात् । समीची इति । उपेति । अदधत । द्वे इति । **17 (50)**

5.2.3.5

पश्चाथ् समीची ताभिर्वै तेदिशोऽदृ॑ᳪहन् यद्द्वे पुरस्ताथ् समीची
उपदधाति द्वे पश्चाथ् समीची दिशां ँविधृत्या अथो पशवो वै
छन्दाᳪसि पशूनेवास्मै समीचो दधात्यष्टावुप दधात्यष्टाक्षरा गायत्री
गायत्रोऽग्नि-र्यावानेवाग्निस्तं चिनुतेऽष्टावुप दधात्यष्टाक्षरा गायत्री
गायत्री सुवर्गं ँलोकमञ्जसा वेद सुवर्गस्य लोकस्य - [ ] **18**

5.2.3.5 - Padam

पश्चात् । समीची इति । ताभिः । वै । ते । दिशः । अदृᳪहन्न् ।
यत् । द्वे इति । पुरस्तात् । समीची इति । उपदधातीत्युप - दधाति ।
द्वे इति । पश्चात् । समीची इति । दिशाम् । विधृत्या इति वि-धृत्यै ।
अथो इति । पशवः । वै । छन्दाᳪसि । पशून् । एव । अस्मै ।
समीचः । दधाति । अष्टौ । उपेति । दधाति । अष्टाक्षरेत्यष्टा-अक्षरा ।

गायत्री । गायत्रः । अग्निः । यावान् । एव । अग्निः । तम् । चिनुते ।
अष्टौ । उपेति । दधाति । अष्टाक्षरेत्यष्टा–अक्षरा । गायत्री । गायत्री ।
सुवर्गमिति सुवः – गम् । लोकम् । अञ्जसा । वेद ।
सुवर्गस्येति सुवः – गस्य । लोकस्य । **18 (50)**

5.2.3.6

प्रज्ञात्यै त्रयोदश लोकंपृणा उप दधात्येकवि\ृशतिः संपद्यन्ते
प्रतिष्ठा वा एकवि\ृशः प्रतिष्ठा गार्.हपत्य एकवि\ृशस्यैव
प्रतिष्ठां गार्.हपत्यमनु प्रति तिष्ठति प्रत्यग्निं चिक्यानस्तिष्ठति य एवं
वेँद पञ्चचितीकं चिन्वीत प्रथमं चिन्वानः पाङ्क्तो यज्ञः पाङ्क्ताः
पशवो यज्ञमेव पशूनव रुन्धे त्रिचितीकं चिन्वीत द्वितीयं
चिन्वानस्त्रय इमे लोका एष्वेव लोकेषु – [ ] **19**

5.2.3.6 - Padam

प्रज्ञात्या इति प्र – ज्ञात्यै । त्रयोदशेति त्रयः – दश ।
लोकंपृणा इति लोकं – पृणाः । उपेति । दधाति ।

एकवि॒ꣳशतिरित्येक - वि॒ꣳशतिः । समिति । पद्यन्ते । प्रतिष्ठेति प्रति - स्था । वै । एकवि॒ꣳश इत्येक - वि॒ꣳशः । प्रतिष्ठेति प्रति - स्था । गार्.हपत्य इति गार्.ह - पत्यः । एकवि॒ꣳशस्येत्येक - वि॒ꣳशस्य । एव । प्रतिष्ठामिति प्रति-स्थाम् । गार्.हपत्यमिति गार्.ह - पत्यम् । अनु । प्रतीति । तिष्ठति । प्रतीति । अग्निम् । चिक्यानः । तिष्ठति । यः । एवम् । वेद । पञ्चचितीकमिति पञ्च-चितीकम् । चिन्वीत । प्रथमम् । चिन्वानः । पाङ्क्तः । यज्ञः । पाङ्क्ताः । पशवः । यज्ञम् । एव । पशून् । अवेति । रुन्धे । त्रिचितीकमिति त्रि - चितीकम् । चिन्वीत । द्वितीयम् । चिन्वानः । त्रयः । इमे । लोकाः । एषु । एव । लोकेषु । **19 (50)**

5.2.3.7

प्रतितिष्ठ्-त्येकचितीकं चिन्वीत तृतीयं चिन्वान एकधा वै सुवर्गो लोक एकवृतैव सुवर्गं ँलोकमेति पुरीषेणाभ्यूहति तस्मान्मा॒ꣳ सेनास्थि छन्नं न दुश्चर्मा भवति य एवं ँवेद पञ्च चितयो भवन्ति

पञ्चभिः पुरीषैरभ्यूहति दश संपद्यन्ते दशाक्षरा विराडन्नं ँविराड् विराज्येवाऽन्नाद्ये प्रतितिष्ठति । **20**

5.2.3.7 - Padam

प्रतीति । तिष्ठति । एकचितीकमित्येक – चितीकम् । चिन्वीत । तृतीयम् । चिन्वानः । एकधेत्येक – धा । वै । सुवर्ग इति सुवः – गः । लोकः । एकवृतेत्येक – वृता । एव । सुवर्गमिति सुवः – गम् । लोकम् । एति । पुरीषेण । अभीति । ऊहति । तस्मात् । मा॒ꣳसेन । अस्थि । छन्नम् । न । दुश्चर्मेति दुः – चर्मा । भवति । यः । एवम् । वेद । पञ्च । चितयः । भवन्ति । पञ्चभिरिति पञ्च – भिः । पुरीषैः । अभीति । ऊहति । दश । समिति । पद्यन्ते । दशाक्षरेति दश – अक्षरा । विराडिति वि–राट् । अन्नम् । विराडिति वि – राट् । विराजीति वि – राजि । एव । अन्नाद्य इत्यन्न – अद्ये । प्रतीति । तिष्ठति । **20 (47)**

(अध्यवसाययति - ह्वेत - द्विश्वामित्रस्या - दधत द्वे - लोकस्य - लोकेषु -सप्तचत्वारिꣳशच्च) (A3)

5.2.4.1

वि वा एतौ द्विषाते यश्च पुराऽग्निर्यश्चोखायाꣳ समितमिति चतसृभिः सं निवपति चत्वारि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनौ तनुवा सꣳ शास्ति समितमित्याह तस्माद्ब्रह्मणा क्षत्रꣳ समेति यथ्सं न्युप्य विहरति तस्माद्ब्रह्मणा क्षत्रं ँव्येत्यृतुभि- [ ] 21

5.2.4.1 - Padam

वीति । वै । एतौ । द्विषाते इति । यः । च । पुरा । अग्निः । यः । च । उखायाम् । समिति । इतम् । इति । चतसृभिरिति चतसृ-भिः । सम् । नीति । वपति । चत्वारि । छन्दाꣳसि । छन्दाꣳसि । खलु । वै । अग्नेः । प्रिया । तनूः । प्रियया । एव । एनौ । तनुवा । समिति । शास्ति । समिति । इतम् । इति । आह । तस्मात् । ब्रह्मणा । क्षत्रम् । समिति । एति । यत् । संन्युप्येति सं - न्युप्य ।

विहरतीति वि - हरति । तस्मात् । ब्रह्मणा । क्षत्रम् । वीति । एति ।
ऋतुभिरित्यृतु - भिः । **21 (50)**

5.2.4.2

-र्वा एतं दीक्षयन्ति स ऋतुभिरेव विमुच्यो मातेव पुत्रं पृथिवी
पुरीष्यमित्याह-र्तुभिरेवैनं दीक्षयित्वर्तुभिर्वि मुञ्चति वैश्वानर्या शिक्यमा
दत्ते स्वदयत्येवैन-न्नैर्.ऋतीः कृष्णा-स्तिस्र-स्तुषपक्वा भवन्ति
निर्.ऋत्यै वा एतद्-भागधेयं ँयत् तुषा निर्.ऋत्यै रूपं कृष्ण~ रूपेणैव
निर्.ऋतिं निरवदयत इमां दिशं ँयन्त्येषा - [ ] **22**

5.2.4.2 - Padam

वै । एतम् । दीक्षयन्ति । सः । ऋतुभिरित्यृतु - भिः । एव । विमुच्य
इति वि - मुच्यः । माता । इव । पुत्रम् । पृथिवी । पुरीष्यम् । इति ।
आह । ऋतुभिरित्यृतु - भिः । एव । एनम् । दीक्षयित्वा ।
ऋतुभिरित्यृतु-भिः । वीति । मुञ्चति । वैश्वानर्या । शिक्यम् । एति ।
दत्ते । स्वदयति । एव । एनत् । नैर्.ऋतीरिति नैः-ऋतीः । कृष्णाः ।
तिस्रः । तुषपक्वा इति तुष - पक्वाः । भवन्ति ।

निर्.ऋत्या इति निः - ऋत्यै । वै । एतत् । भागधेयमिति
भाग - धेयम् । यत् । तुषाः । निर्.ऋत्या इति निः-ऋत्यै । रूपम् ।
कृष्णम् । रूपेण । एव । निर्.ऋतिमिति निः - ऋतिम् । निरवदयत
इति निः - अवदयते । इमाम् । दिशम् । यन्ति । एषा । **22 (50)**

5.2.4.3

वै निर्.ऋत्यै दिक् स्वायामेव दिशि निर्.ऋतिं निरवदयते स्वकृत इरिण
उप दधाति प्रदरे वैतद्वै निर्.ऋत्या आयतन७ स्व एवाऽऽ*यतने
निर्.ऋतिं निरवदयते शिक्यमभ्युप दधाति नैर्.ऋतो वै पाशः
साक्षादेवैनं निर्.ऋतिपाशान्-मुञ्चति तिस्र उप दधाति त्रेधाविहितो वै
पुरुषो यावानेव पुरुषस्तस्मान्-निर्.ऋतिमव यजते पराचीरुप-[] **23**

5.2.4.3 - Padam

वै । निर्.ऋत्या इति निः - ऋत्यै । दिक् । स्वायाम् । एव । दिशि ।
निर्.ऋतिमिति निः - ऋतिम् । निरवदयत इति निः - अवदयते ।
स्वकृत इति स्व - कृते । इरिणे । उपेति । दधाति । प्रदर इति
प्र - दरे । वा । एतत् । वै । निर्.ऋत्या इति निः - ऋत्याः ।

आयतनमित्या – यतनम् । स्वे । एव । आयतन इत्या – यतने ।
निर्.ऋतिमिति निः – ऋतिम् । निरवदयत इति निः – अवदयते ।
शिक्यम् । अभि । उपेति । दधाति । नैर्.ऋत इति नैः – ऋतः । वै ।
पाशः । साक्षादिति स – अक्षात् । एव । एनम् । निर्.ऋतिपाशादिति
निर्.ऋति – पाशात् । मुञ्चति । तिस्रः । उपेति । दधाति ।
त्रेधाविहित इति त्रेधा – विहितः । वै । पुरुषः । यावान् । एव ।
पुरुषः । तस्मात् । निर्.ऋतिमिति निः – ऋतिम् । अवेति । यजते ।
पराचीः । उपेति । **23 (50)**

5.2.4.4

दधाति पराचीमेवास्मान्–निर्.ऋतिं प्रणुदते ऽप्रतीक्षमा यन्ति
निर्.ऋत्या अन्तर्.हित्यै मार्जयित्वोप तिष्ठन्ते मेध्यत्वाय गार्.हपत्यमुप
तिष्ठन्ते निर्.ऋति लोक एव चरित्वा पूता देवलोकमुपावर्तन्त
एकयोप तिष्ठन्त एकधैव यजमाने वीर्यं दधति निवेशनः सङ्गमनो
वसूनामित्याह प्रजा वै पशवो वसु प्रजयैवैनं पशुभिः
समर्धयन्ति । **24**

5.2.4.4 - Padam

दधाति । पराचीम् । एव । अस्मात् । निर्.ऋतिमिति निः – ऋतिम् ।
प्रेति । नुदते । अप्रतीक्षमित्यप्रति – ईक्षम् । एति । यन्ति ।
निर्.ऋत्या इति निः – ऋत्याः । अन्तर्हित्या इत्यन्तः – हित्यै ।
मार्जयित्वा । उपेति । तिष्ठन्ते । मेध्यत्वायेति मेध्य – त्वाय ।
गार्हपत्यमिति गार्ह – पत्यम् । उपेति । तिष्ठन्ते । निर्.ऋतिलोक इति
निर्.ऋति – लोके । एव । चरित्वा । पूताः । देवलोकमिति
देव – लोकम् । उपावर्तन्त इत्युप – आवर्तन्ते । एकया । उपेति ।
तिष्ठन्ते । एकधेत्येक – धा । एव । यजमाने । वीर्यम् । दधति ।
निवेशन इति नि–वेशनः । सङ्गमन इति सं– गमनः । वसूनाम् ।
इति । आह । प्रजेति प्र – जा । वै । पशवः । वसु ।
प्रजयेति प्र – जया । एव । एनम् । पशुभिरिति पशु – भिः ।
समिति । अर्धयन्ति । **24 (48)**

(ऋतुभि – रेषा– पराचीरुपा – ष्टाचत्वारिꣳशच्च) (A4)

5.2.5.1

पुरुषमात्रेण वि मिमीते यज्ञेन वै पुरुषः संमितो यज्ञपरुषैवैनं

ँविमिमीते यावान् पुरुष ऊर्ध्वबाहुस्तावान् भवत्येतावद्वै पुरुषे वीर्यं

ँवीर्येणैवैनं ँवि मिमीते पक्षी भवति न ह्यपक्षः पतितु-मर्.हत्यरत्निना

पक्षौ द्राघीया॒ँसौ भवतस्तस्मात् पक्षप्रवया॒ँसि वया॒ँसि

व्याममात्रौ पक्षौ च पुच्छं च भवत्येतावद्वै पुरुषे वीर्यं -[ ] **25**

5.2.5.1 - Padam

पुरुषमात्रेणेति पुरुष - मात्रेण । वीति । मिमीते । यज्ञेन । वै ।

पुरुषः । सम्मित इति सं - मितः । यज्ञपरुषेति यज्ञ-परुषा । एव ।

एनम् । वीति । मिमीते । यावान् । पुरुषः । ऊर्ध्वबाहुरित्युर्ध्व-बाहुः ।

तावान् । भवति । एतावत् । वै । पुरुषे । वीर्यम् । वीर्येण । एव ।

एनम् । वीति । मिमीते । पक्षी । भवति । न । हि । अपक्षः ।

पतितुम् । अर्हति । अरत्निना । पक्षौ । द्राघीया॒ँसौ । भवतः ।

तस्मात् । पक्षप्रवया॒ँसीति पक्ष - प्रवया॒ँसि । वया॒ँसि ।

व्याममात्राविति व्याम - मात्रौ । पक्षौ । च । पुच्छम् । च । भवति ।

एतावत् । वै । पुरुषे । वीर्यम् । **25 (50)**

5.2.5.2

सँवीर्यसंमितो वेणुना वि मिमीत आग्नेयो वै वेणुः सयोनित्वाय यजुषा युनक्ति यजुषा कृषति व्यावृत्त्यै षड्गवेन कृषति षड् वा ऋतव ऋतुभिरेवैनं कृषति यद् द्वादशगवेन सँवथ्सरेणैवे यं ँवा अग्ने–रतिदाहादबिभेथ् सैतद् द्विगुणमपश्यत् कृष्टं चाकृष्टं च ततो वा इमां नाऽत्यदहद्यत् कृष्टं चाकृष्टं च – [ ] **26**

5.2.5.2 - Padam

वीर्यसम्मित इति वीर्य – सम्मितः । वेणुना । वीति । मिमीते । आग्नेयः । वै । वेणुः । सयोनित्वायेति सयोनि – त्वाय । यजुषा । युनक्ति । यजुषा । कृषति । व्यावृत्त्या इति वि – आवृत्त्यै । षड्गवेनेति षट् – गवेन । कृषति । षट् । वै । ऋतवः । ऋतुभिरित्यृतु – भिः । एव । एनम् । कृषति । यत् । द्वादशगवेनेति द्वादश – गवेन । सँवथ्सरेणेति सं – वथ्सरेण । एव । इयम् । वै । अग्नेः । अतिदाहादित्यति – दाहात् । अबिभेत् । सा । एतत् ।

द्विगुणमिति द्वि – गुणम् । अपश्यत् । कृष्टम् । च । अकृष्टम् । च ।
ततः । वै । इमाम् । न । अतीति । अदहत् । यत् । कृष्टम् । च ।
अकृष्टम् । च । **26 (50)**

5.2.5.3

भवत्यस्या अनतिदाहाय द्विगुणं त्वा अग्नि–मुद्यन्तु–मर्.हतीत्याहुर्यत्
कृष्टं चाकृष्टं च भवत्यग्नेरुद्यत्या एतावन्तो वै पशवो द्विपादश्च
चतुष्पादश्च तान् यत् प्राच उथ्सृजेद्–रुद्रायापि दध्याद्–यद्–दक्षिणा
पितृभ्यो निधुवेद्यत् प्रतीचो रक्षाꣳसि हन्युरुदीच उथ्सृजत्येषा वै
देवमनुष्याणाꣳ शान्ता दिक् – [ ] **27**

5.2.5.3 - Padam

भवति । अस्याः । अनतिदाहायेत्यनति – दाहाय । द्विगुणमिति
द्वि – गुणम् । तु । वै । अग्निम् । उद्यन्तुमित्युत् – यन्तुम् । अर्हति ।
इति । आहुः । यत् । कृष्टम् । च । अकृष्टम् । च । भवति । अग्नेः ।
उद्यत्या इत्युत् – यत्यै । एतावन्तः । वै । पशवः । द्विपाद इति
द्वि – पादः । च । चतुष्पाद इति चतुः – पादः । च । तान् । यत् ।

प्राचः । उथ्सृजेदित्युत् - सृजेत् । रुद्राय । अपीति । दध्यात् ।
यत् । दक्षिणा । पितृभ्य इति पितृ - भ्यः । नीति । धुवेत् । यत् ।
प्रतीचः । रक्षाꣳसि । हन्युः । उदीचः । उदिति । सृजति । एषा ।
वै । देवमनुष्याणामिति देव - मनुष्याणाम् । शान्ता । दिक् । **27 (50)**

5.2.5.4

तामेवैनाननूथ् सृजत्यथो खल्विमां दिशमुथ् सृजत्यसौ वा आदित्यः
प्राणः प्राणमेवैना-ननूथ्सृजति दक्षिणा पर्यावर्तन्ते स्वमेव वीर्यमनु
पर्यावर्तन्ते तस्माद्-दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो
आदित्यस्यैवाऽऽ*वृतमनु पर्यावर्तन्ते तस्मात् पराञ्चः पशवो वि
तिष्ठन्ते प्रत्यञ्च आ वर्तन्ते तिस्रस्तिस्रः सीताः - [ ] **28**

5.2.5.4 - Padam

ताम् । एव । एनान् । अनु । उदिति । सृजति । अथो इति । खलु ।
इमाम् । दिशम् । उदिति । सृजति । असौ । वै । आदित्यः । प्राण
इति प्र - अनः । प्राणमिति प्र - अनम् । एव । एनान् । अनु ।
उदिति । सृजति । दक्षिणा । पर्यावर्तन्त इति परि - आवर्तन्ते ।

स्वम् । एव । वीर्यम् । अन्विति । पर्यावर्तन्त इति परि - आवर्तन्ते । तस्मात् । दक्षिणः । अर्धः । आत्मनः । वीर्यावत्तर इति वीर्यावत् - तरः । अथो इति । आदित्यस्य । एव । आवृतमित्या - वृतम् । अन्विति । पर्यावर्तन्त इति परि - आवर्तन्ते । तस्मात् । पराञ्चः । पशवः । वीति । तिष्ठन्ते । प्रत्यञ्चः । एति । वर्तन्ते । तिस्रस्तिस्र इति तिस्रः - तिस्रः । सीताः । **28 (50)**

5.2.5.5

कृषति त्रिवृतमेव यज्ञमुखे वि यातयत्योषधीर्वपति ब्रह्मणाऽन्नमव रुन्धेऽर्केऽर्कश्चीयते चतुर्दशभिर्वपति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्या अन्नस्यान्नस्य वपत्यन्नस्या-न्नस्यावरुद्ध्यै कृष्टे वपति कृष्टे ह्योषधयः प्रतितिष्ठन्त्यनुसीतं वँपति प्रजात्यै द्वादशसु सीतासु वपति द्वादश मासाः सँवथ्सरः सँवथ्सरेणैवास्मा अन्नं पचति यदग्निचि - [ ] **29**

5.2.5.5 - Padam

कृषति । त्रिवृतमिति त्रि – वृतम् । एव । यज्ञमुख इति यज्ञ–मुखे ।
वीति । यातयति । ओषधीः । वपति । ब्रह्मणा । अन्नम् । अवेति ।
रुन्धे । अर्के । अर्कः । चीयते । चतुर्दशभिरिति चतुर्दश – भिः ।
वपति । सप्त । ग्राम्याः । ओषधयः । सप्त । आरण्याः । उभयीषाम् ।
अवरुद्ध्या इत्यव – रुध्यै । अन्नस्यान्नस्येत्यन्नस्य – अन्नस्य ।
वपति । अन्नस्यान्नस्येत्यन्नस्य–अन्नस्य । अवरुद्ध्या इत्यव–रुध्यै ।
कृष्टे । वपति । कृष्टे । हि । ओषधयः । प्रतितिष्ठन्तीति प्रति–तिष्ठन्ति ।
अनुसीतमित्यनु – सीतम् । वपति । प्रजात्या इति प्र – जात्यै ।
द्वादशस्विति द्वादश – सु । सीतासु । वपति । द्वादश । मासाः ।
सँवथ्सर इति सं – वथ्सरः । सँवथ्सरेणेति सं – वथ्सरेण । एव ।
अस्मै । अन्नम् । पचति । यत् । अग्निचिदित्यग्नि – चित् । **29 (50)**

5.2.5.6

–दनवरुद्धस्या–श्नीयादव–रुद्धेन व्यृध्येत ये वनस्पतीनां फलग्रहय–
स्तानिध्मेऽपि प्रोक्षे–दनवरुद्धस्या–वरुद्ध्यै दिग्भ्यो लोष्टान्थ्

समस्यति दिशामेव वीर्यमवरुध्य दिशां ँवीर्येऽग्निं चिनुते यं
द्विष्याद्–यत्र स स्यात् तस्यै दिशो लोष्टमा हरेदिष–मूर्जमहमित आ
दद इतीषमेवोर्जं तस्यै दिशोऽव ( ) रुन्धे क्षोधुको भवति यस्तस्यां
दिशि भवत्युत्तरवेदिमुप वपत्युत्तरवेद्या॑ ह्यग्निश्चीयते ऽथो पशवो वा
उत्तरवेदिः पशूनेवाव रुन्धेऽथो यज्ञपरुषोऽनन्तरित्यै । **30**

5.2.5.6 - Padam

अनवरुद्धस्येत्यनव–रुद्धस्य । अश्नीयात् । अवरुद्धेनेत्यव – रुद्धेन ।
वीति । ऋध्येत । ये । वनस्पतीनाम् । फलग्रहय इति फल–ग्रहयः ।
तान् । इध्मे । अपि । प्रेति । उक्षेत् । अनवरुद्धस्येत्यनव–रुद्धस्य ।
अवरुध्या इत्यव – रुध्यै । दिग्भ्य इति दिक् – भ्यः । लोष्टान् ।
समिति । अस्यति । दिशाम् । एव । वीर्यम् । अवरुध्येत्यव–रुध्य ।
दिशाम् । वीर्ये । अग्निम् । चिनुते । यम् । द्विष्यात् । यत्र । सः ।
स्यात् । तस्यै । दिशः । लोष्टम् । एति । हरेत् । इषम् । ऊर्जम् ।
अहम् । इतः । एति । ददे । इति । इषम् । एव । ऊर्जम् । तस्यै ।

दिशः । अवेति ( ) । रुन्धे । क्षोधुकः । भवति । यः । तस्याम् ।
दिशि । भवति । उत्तरवेदिमित्युत्तर – वेदिम् । उपेति । वपति ।
उत्तरवेद्यामित्युत्तर – वेद्याम् । हि । अग्निः । चीयते । अथो इति ।
पशवः । वै । उत्तरवेदिरित्युत्तर – वेदिः । पशून् । एव । अवेति ।
रुन्धे । अथो इति । यज्ञपरुष इति यज्ञ – परुषः ।
अनन्तरित्या इत्यनन्तः – इत्यै । **30 (75)**

(च भवत्येतावद्वै पुरुषे वीर्यं – यँत्कृष्टञ्चाऽकृष्टञ्च – दिख्– सीता – अग्निचि – दव – पञ्चविंशतिश्च) (A5)

5.2.6.1

अग्ने तव श्रवो वय इति सिकता नि वपत्येतद्वा अग्नेर्वैश्वानरस्य
सूक्तꣳ सूक्तेनैव वैश्वानरमव रुन्धे षड्भिर्नि वपति षड्वा ऋतवः
सँवथ्सरः सँवथ्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे समुद्रं
वै नामैतच्छन्दः समुद्रमनु प्रजाः प्रजायन्ते यदेतेन सिकता नि
वपति प्रजानां प्रजननायेन्द्रो – [ ] **31**

5.2.6.1 - Padam

अग्ने । तव । श्रवः । वयः । इति । सिकताः । नीति । वपति ।
एतत् । वै । अग्नेः । वैश्वानरस्य । सूक्तमिति सु – उक्तम् ।
सूक्तेनेति सु – उक्तेन । एव । वैश्वानरम् । अवेति । रुन्धे ।
षड्भिरिति षट् – भिः । नीति । वपति । षट् । वै । ऋतवः ।
सँवथ्सर इति सं – वथ्सरः । सँवथ्सर इति सं – वथ्सरः ।
अग्निः । वैश्वानरः । साक्षादिति स – अक्षात् । एव । वैश्वानरम् ।
अवेति । रुन्धे । समुद्रम् । वै । नाम । एतत् । छन्दः । समुद्रम् ।
अन्विति । प्रजा इति प्र – जाः । प्रेति । जायन्ते । यत् । एतेन ।
सिकताः । निवपतीति नि – वपति । प्रजानामिति प्र – जानाम् ।
प्रजननायेति प्र – जननाय । इन्द्रः । **31 (50)**

5.2.6.2

वृत्राय वज्रं प्राहरथ् स त्रेधा व्यभवथ् स्फ्यस्तृतीयꣳ रथस्तृतीयं
ँयूपस्तृतीयं येऽन्तः शरा अशीर्यन्त ताः शर्करा अभवन्
तच्छर्कराणाꣳ शर्करत्वं ँवज्रो वै शर्कराः पशुरग्नि–र्यच्छर्कराभिरग्निं

परिमिनोति वज्रेणैवास्मै पशून् परि गृह्णाति तस्माद्–वज्रेण पशवः परिगृहीतास्तस्माथ् स्थेयानस्थेयसो नोप हरते त्रिसप्ताभिः पशुकामस्य– [ ] **32**

5.2.6.2 - Padam

वृत्राय । वज्रम् । प्रेति । अहरत् । सः । त्रेधा । वीति । अभवत् । स्फ्यः । तृतीयम् । रथः । तृतीयम् । यूपः । तृतीयम् । ये । अन्तः शरा इत्यन्तः–शराः । अशीर्यन्त । ताः । शर्कराः । अभवन्न् । तत् । शर्कराणाम् । शर्करत्वमिति शर्कर – त्वम् । वज्रः । वै । शर्कराः । पशुः । अग्निः । यत् । शर्कराभिः । अग्निम् । परिमिनोतीति परि – मिनोति । वज्रेण । एव । अस्मै । पशून् । परीति । गृह्णाति । तस्मात् । वज्रेण । पशवः । परिगृहीता इति परि – गृहीताः । तस्मात् । स्थेयान् । अस्थेयसः । न । उपेति । हरते । त्रिसप्ताभिरिति त्रि – सप्ताभिः । पशुकामस्येति पशु – कामस्य । **32 (50)**

5.2.6.3

परि मिनुयाथ् सप्त वै शीर्.षण्याः प्राणाः प्राणाः पशवः प्राणैरेवास्मै पशूनव रुन्धे त्रिणवाभि-र्भ्रातृव्यवत-स्त्रिवृतमेव वज्र॑ संभृत्य भ्रातृव्याय प्रहरति स्तृत्या अपरिमिताभिः परि मिनुया-दपरिमितस्या-वरुद्ध्यै यं कामयेतापशुः स्यादित्यपरिमित्य तस्य शर्कराः सिकता व्यूहेदपरिगृहीत एवास्य विषूचीन॑ रेतः परा सिञ्चत्यपशुरेव भवति – [ ] **33**

5.2.6.3 - Padam

परीति । मिनुयात् । सप्त । वै । शीर्.षण्याः । प्राणा इति प्र-अनाः । प्राणा इति प्र - अनाः । पशवः । प्राणैरिति प्र - अनैः । एव । अस्मै । पशून् । अवेति । रुन्धे । त्रिणवाभिरिति त्रि - नवाभिः । भ्रातृव्यवत इति भ्रातृव्य - वतः । त्रिवृतमिति त्रि - वृतम् । एव । वज्रम् । संभृत्येति सं - भृत्य । भ्रातृव्याय । प्रेति । हरति । स्तृत्यै । अपरिमिताभिरित्यपरि - मिताभिः । परीति । मिनुयात् । अपरिमितस्येत्यपरि - मितस्य । अवरुध्या इत्यव - रुध्यै । यम् ।

कामयेत । अपशुः । स्यात् । इति । अपरिमित्येत्यपरि - मित्य ।
तस्य । शर्कराः । सिकताः । वीति । ऊहेत् ।
अपरिगृहीत इत्यपरि - गृहीते । एव । अस्य । विषूचीनम् । रेतः ।
परेति । सिञ्चति । अपशुः । एव । भवति । **33 (50)**

5.2.6.4

यं कामयेत पशुमान्थ् स्यादिति परिमित्य तस्य शर्कराः सिकता व्यूहेत् परिगृहीत एवास्मै समीचीनꣳ रेतः सिञ्चति पशुमानेव भवति सौम्या व्यूहति सोमो वै रेतोधा रेत एव तद्-दधाति गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मण-स्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यः शम्युं बार्.हस्पत्यं मेधो नोपानमथ् सोऽग्निं प्राऽविशथ् - [ ] **34**

5.2.6.4 - Padam

यम् । कामयेत । पशुमानिति पशु - मान् । स्यात् । इति ।
परिमित्येति परि-मित्य । तस्य । शर्कराः । सिकताः । वीति । ऊहेत् ।
परिगृहीत इति परि - गृहीते । एव । अस्मै । समीचीनम् । रेतः ।
सिञ्चति । पशुमानिति पशु-मान् । एव । भवति । सौम्या । वीति ।

ऊहति । सोमः । वै । रेतोधा इति रेतः - धाः । रेतः । एव । तत् ।
दधाति । गायत्रिया । ब्राह्मणस्य । गायत्रः । हि । ब्राह्मणः । त्रिष्टुभा ।
राजन्यस्य । त्रैष्टुभः । हि । राजन्यः । शँयुमिति शं - युम् ।
बार्हस्पत्यम् । मेधः । न । उपेति । अनमत् । सः । अग्निम् । प्रेति ।
अविशत् । **34 (50)**

5.2.6.5

सोऽग्नेः कृष्णो रूपं कृत्वोदायत सोऽश्वं प्राऽविशथ् सोऽश्वस्या -
वान्तरशफो-भवद्-यदश्वमाक्रमयति य एव मेधोऽश्वं प्राऽविशत्
तमेवाव रुन्धे प्रजापतिनाऽग्निश्चेतव्य इत्याहुः प्राजापत्योऽश्वो
यदश्वमाक्रमयति प्रजापतिनैवाऽग्निं चिनुते पुष्करपर्णमुप दधाति योनिर्वा
अग्नेः पुष्करपर्ण७ँ सयोनि- ( ) -मेवाग्निं चिनुते ऽपां पृष्ठमसीत्युप
दधात्यपां ँवा एतत् पृष्ठं ँयत् पुष्करपर्ण७ँ रूपेणैवैनदुप दधाति । **35**

5.2.6.5 - Padam

सः । अग्नेः । कृष्णः । रूपम् । कृत्वा । उदिति । आयत । सः ।
अश्वम् । प्रेति । अविशत् । सः । अश्वस्य ।

अवान्तरशफ इत्यवान्तर - शफः । अभवत् । यत् । अश्वम् ।
आक्रमयतीत्या - क्रमयति । यः । एव । मेधः । अश्वम् । प्रेति ।
अविशत् । तम् । एव । अवेति । रुन्धे । प्रजापतिनेति
प्रजा - पतिना । अग्निः । चेतव्यः । इति । आहुः । प्राजापत्य इति
प्राजा - पत्यः । अश्वः । यत् । अश्वम् । आक्रमयतीत्या-क्रमयति ।
प्रजापतिनेति प्रजा - पतिना । एव । अग्निम् । चिनुते ।
पुष्करपर्णमिति पुष्कर - पर्णम् । उपेति । दधाति । योनिः । वै ।
अग्नेः । पुष्करपर्णमिति पुष्कर - पर्णम् । सयोनिमिति
स-योनिम् ( ) । एव । अग्निम् । चिनुते । अपाम् । पृष्ठम् । असि ।
इति । उपेति । दधाति । अपाम् । वै । एतत् । पृष्ठम् । यत् ।
पुष्करपर्णमिति पुष्कर - पर्णम् । रूपेण । एव । एनत् । उपेति ।
दधाति । **35 (70)** *(इन्द्रः - पशुकामस्य - भवत्य - विशथ् - सयोनिं - विꣳशतिश्च) (A6)*

5.2.7.1

ब्रह्म जज्ञानमिति रुक्ममुप दधाति ब्रह्ममुखा वै प्रजापतिः प्रजा असृजत ब्रह्ममुखा एव तत् प्रजा यजमानः सृजते ब्रह्म जज्ञानमित्याह तस्माद्ब्राह्मणो मुख्यो मुख्यो भवति य एवं वेद ब्रह्मवादिनो वदन्ति न पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्य इति यत् पृथिव्यां चिन्वीत पृथिवीꣳ शुचाऽर्पयेन्नौषधयो न वनस्पतयः – [ ] **36**

5.2.7.1 - Padam

ब्रह्म । जज्ञानम् । इति । रुक्मम् । उपेति । दधाति । ब्रह्ममुखा इति ब्रह्म – मुखाः । वै । प्रजापतिरिति प्रजा – पतिः । प्रजा इति प्र – जाः । असृजत । ब्रह्ममुखा इति ब्रह्म – मुखाः । एव । तत् । प्रजा इति प्र – जाः । यजमानः । सृजते । ब्रह्म । जज्ञानम् । इति । आह । तस्मात् । ब्राह्मणः । मुख्यः । मुख्यः । भवति । यः । एवम् । वेद । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । न । पृथिव्याम् । न । अन्तरिक्षे । न । दिवि । अग्निः । चेतव्यः । इति । यत् । पृथिव्याम् । चिन्वीत । पृथिवीम् ।

शुचा । अर्पयेत् । न । ओषधयः । न । वनस्पतयः । **36 (50)**

5.2.7.2

प्र जायेरन् यदन्तरिक्षे चिन्वीतान्तरिक्षꣳ शुचाऽर्पयेन्न वयाꣳसि प्र जायेरन् यद्–दिवि चिन्वीत दिवꣳ शुचाऽर्पयेन्न पर्जन्यो वर्.षेद्रुक्ममुप दधात्यमृतं ँवै हिरण्यममृत एवाग्निं चिनुते प्रजात्यै हिरण्मयं पुरुषमुप दधाति यजमानलोकस्य विधृत्यै यदिष्टकाया आतृण्णमनूपदध्यात् पशूनां च यजमानस्य च प्राणमपि दध्याद् दक्षिणतः– [ ] **37**

5.2.7.2 - Padam

प्रेति । जायेरन्न् । यत् । अन्तरिक्षे । चिन्वीत । अन्तरिक्षम् । शुचा । अर्पयेत् । न । वयाꣳसि । प्रेति । जायेरन्न् । यत् । दिवि । चिन्वीत । दिवम् । शुचा । अर्पयेत् । न । पर्जन्यः । वर्.षेत् । रुक्मम् । उपेति । दधाति । अमृतम् । वै । हिरण्यम् । अमृते । एव । अग्निम् । चिनुते । प्रजात्या इति प्र – जात्यै । हिरण्मयम् । पुरुषम् । उपेति । दधाति । यजमानलोकस्येति यजमान – लोकस्य ।

विधृत्या इति वि–धृत्यै । यत् । इष्टकायाः । आतृण्णमित्या–तृण्णम् ।
अनूपदध्यादित्यनु – उपदध्यात् । पशूनाम् । च । यजमानस्य । च ।
प्राणमिति प्र – अनम् । अपीति । दध्यात् । दक्षिणतः । **37 (50)**

5.2.7.3

प्राञ्चमुप दधाति दाधार यजमानलोकं न पशूनां च यजमानस्य च
प्राणमपि दधात्यथो खल्विष्टकाया आतृण्णमनूप दधाति प्राणानामुथ्सृष्ट्यै
द्रफ्सश्चस्कन्देत्यभि मृशति होत्रास्वेवैनं प्रतिष्ठापयति स्रुचावुप
दधात्याज्यस्य पूर्णां कार्ष्मर्यमयीं दद्ध्नः पूर्णा–मौदुंबरीमियं वै
कार्ष्मर्यमय्यसावौ–दुंबरीमे एवोप धत्ते – [ ] **38**

5.2.7.3 - Padam

प्राञ्चम् । उपेति । दधाति । दाधार । यजमानलोकमिति
यजमान – लोकम् । न । पशूनाम् । च । यजमानस्य । च ।
प्राणमिति प्र – अनम् । अपीति । दधाति । अथो इति । खलु ।
इष्टकायाः । आतृण्णमित्या – तृण्णम् । अनु । उपेति । दधाति ।
प्राणानामिति प्र – अनानाम् । उथ्सृष्ट्या इत्युत् – सृष्ट्यै । द्रफ्सः ।

चस्कन्द । इति । अभीति । मृशति । होत्रासु । एव । एनम् । प्रतीति । स्थापयति । स्रुचौ । उपेति । दधाति । आज्यस्य । पूर्णाम् । कार्ष्मर्यमयीमिति कार्ष्मर्य - मयीम् । दध्नः । पूर्णाम् । औदुंबरीम् । इयम् । वै । कार्ष्मर्यमयीति कार्ष्मर्य - मयी । असौ । औदुंबरी । इमे इति** । एव । उपेति । धत्ते । **38 (50)**

5.2.7.4

तूष्णीमुप दधाति न हीमे यजुषाऽऽप्तुमर्.हति दक्षिणां कार्ष्मर्यमयी - मुत्तरामौ-दुम्बरीं तस्मादस्या असावुत्तरा ऽऽज्यस्य पूर्णां कार्ष्मर्यमयीं ँवज्रो वा आज्यं ँवज्रः कार्ष्मर्यो वज्रेणैव यज्ञस्य दक्षिणतो रक्षा॑ᳪस्यप हन्ति दध्नः पूर्णामौदुम्बरीं पशवो वै दध्यूर्गुदुम्बरः पशुष्वेवोर्जं दधाति पूर्णे उप दधाति पूर्णे एवैन-[ ] **39**

5.2.7.4 - Padam

तूष्णीम् । उपेति । दधाति । न । हि । इमे इति । यजुषा । आप्तुम् । अर्.हति । दक्षिणाम् । कार्ष्मर्यमयीमिति कार्ष्मर्य - मयिम् । उत्तरामित्युत् - तराम् । औदुंबरीम् । तस्मात् । अस्याः । असौ ।

उत्तरेत्युत् – तरा । आज्यस्य । पूर्णाम् । कार्ष्मर्यमयीमिति

कार्ष्मर्य – मयिम् । वज्रः । वै । आज्यम् । वज्रः । कार्ष्मर्यः ।

वज्रेण । एव । यज्ञस्य । दक्षिणतः । रक्षाꣳसि । अपेति ।

हन्ति । दध्नः । पूर्णाम् । औदुंबरीम् । पशवः । वै । दधि । ऊर्क् ।

उदुंबरः । पशुषु । एव । ऊर्जम् । दधाति । पूर्णे इति । उपेति ।

दधाति । पूर्णे इति । एव । एनम् । **39 (50)**

5.2.7.5

ममुष्मिन् ँल्लोक उपतिष्ठेते विराज्यग्निश्चेतव्य इत्याहुः स्रुग्वै

विराड्यथ् स्रुचावुपदधाति विराज्येवाग्निं चिनुते यज्ञमुखेयज्ञमुखे वै

क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति यज्ञमुखꣳ रुक्मो यद्–

रुक्मं ँव्याघारयति यज्ञमुखादेव रक्षाꣳस्यप हन्ति पञ्चभिर्व्याघारयति

पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्माद्–रक्षाꣳस्यप हन्त्यक्ष्णयाव्या घारयति

तस्मादक्ष्णया ( ) पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै । **40**

5.2.7.5 - Padam

अमुष्मिन्न् । लोके । उपेति । तिष्ठेते इति । विराजीति वि - राजि ।
अग्निः । चेतव्यः । इति । आहुः । स्रुक् । वै । विराडिति वि-राट् ।
यत् । स्रुचौ । उपदधातीत्युप - दधाति । विराजीति वि - राजि ।
एव । अग्निम् । चिनुते । यज्ञमुखे यज्ञमुख इति यज्ञमुखे-यज्ञमुखे ।
वै । क्रियमाणे । यज्ञम् । रक्षाᳪं᳚सि । जिघाᳪं᳚सन्ति ।
यज्ञमुखमिति यज्ञ - मुखम् । रुक्मः । यत् । रुक्मम् । व्याघारयतीति
वि - आघारयति । यज्ञमुखादिति यज्ञ - मुखात् । एव । रक्षाᳪं᳚सि ।
अपेति । हन्ति । पञ्चभिरिति पञ्च - भिः । व्याघारयतीति
वि - आघारयति । पाङ्क्तः । यज्ञः । यावान् । एव । यज्ञः । तस्मात् ।
रक्षाᳪं᳚सि । अपेति । हन्ति । अक्ष्णया । व्याघारयतीति
वि - आघारयति । तस्मात् । अक्ष्णया ( ) । पशवः । अङ्गानि ।
प्रेति । हरन्ति । प्रतिष्ठित्या इति प्रति - स्थित्यै । **40 (55)**

(वनस्पतयो- दक्षिणतो- धत्त- एनं- तस्मा दक्ष्णया- पञ्च च)
(A7)

5.2.8.1

स्वयमातृण्णामुप दधातीयं वै स्वयमातृण्णेमामेवोप धत्ते

ऽश्वमुप घ्रापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः

प्रजापतिनैवाऽग्निं चिनुते प्रथमेष्टकोपधीयमाना पशूनां च

यजमानस्य च प्राणमपि दधाति स्वयमातृण्णा भवति

प्राणानामुथ्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्या

अग्नावग्निश्चेतव्य इत्याहुरेष वा – [ ] **41**

5.2.8.1 - Padam

स्वयमातृण्णामिति स्वयं – आतृण्णाम् । उपेति । दधाति । इयम् ।

वै । स्वयमातृण्णेति स्वयं–आतृण्णा । इमाम् । एव । उपेति । धत्ते ।

अश्वम् । उपेति । घ्रापयति । प्राणमिति प्र–अनम् । एव । अस्याम् ।

दधाति । अथो इति । प्राजापत्य इति प्रजा – पत्यः । वै । अश्वः ।

प्रजापतिनेति प्रजा – पतिना । एव । अग्निम् । चिनुते । प्रथमा ।

इष्टका । उपधीयमानेत्युप–धीयमाना । पशूनाम् । च । यजमानस्य ।

च । प्राणमिति प्र – अनम् । अपीति । दधाति । स्वयमातृण्णेति स्वयं – आतृण्णा । भवति । प्राणानामिति प्र – अनानाम् । उथ्सृष्ट्या इत्युत् – सृष्ट्यै । अथो इति । सुवर्गस्येति सुवः–गस्य । लोकस्य । अनुख्यात्या इत्यनु – ख्यात्यै । अग्नौ । अग्निः । चेतव्यः । इति । आहुः । एषः । वै । **41 (50)**

5.2.8.2

अग्निर्वैश्वानरो यद्ब्राह्मणस्तस्मै प्रथमामिष्टकां यजुष्कृतां प्रयच्छेत् तां ब्राह्मणश्चोप दध्याता–मग्नावेव तदग्निं चिनुत ईश्वरो वा एष आर्तिमार्तोर्यो–ऽविद्वानिष्टका–मुपदधाति त्रीन् वरान् दद्यात् त्रयो वै प्राणाः प्राणाना॑ स्पृत्यै द्वावेव देयौ द्वौ हि प्राणावेक एव देय एको हि प्राणः पशु – [ ] **42**

5.2.8.2 - Padam

अग्निः । वैश्वानरः । यत् । ब्राह्मणः । तस्मै । प्रथमाम् । इष्टकाम् । यजुष्कृतामिति यजुः – कृताम् । प्रेति । यच्छेत् । ताम् । ब्राह्मणः । च । उपेति । दध्याताम् । अग्नौ । एव । तत् । अग्निम् । चिनुते ।

ईश्वरः । वै । एषः । आर्तिम् । आर्तोरित्या–अर्तोः । यः । अविद्वान् । इष्टकाम् । उपदधातीत्युप – दधाति । त्रीन् । वरान् । दद्यात् । त्रयः । वै । प्राणा इति प्र – अनाः । प्राणानामिति प्र – अनानाम् । स्पृत्यै । द्वौ । एव । देयौ । द्वौ । हि । प्राणाविति प्र – अनौ । एकः । एव । देयः । एकः । हि । प्राण इति प्र – अनः । पशुः । **42 (50)**

5.2.8.3

–र्वा एष यदग्निर्न खलु वै पशव आयवसे रमन्ते दूर्वेष्टकामुप दधाति पशूनां धृत्यै द्वाभ्यां प्रतिष्ठित्यै काण्डात् काण्डात् प्ररोहन्तीत्याह काण्डेनकाण्डेन ह्येषा प्रतितिष्ठत्येवा नो दूर्वे प्रतनु सहस्रेण शतेन चेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै देवलक्ष्मं ँवै त्र्यालिखिता तामुत्तरलक्ष्माणं देवा उपादधता–धरलक्ष्माण–मसुरा यं – [ ] **43**

5.2.8.3 - Padam

वै । एषः । यत् । अग्निः । न । खलु । वै । पशवः । आयवसे । रमन्ते । दूर्वेष्टकामिति दूर्वा – इष्टकाम् । उपेति । दधाति ।

पशूनाम् । धृत्यै । द्वाभ्याम् । प्रतिष्ठित्या इति प्रति – स्थित्यै ।
काण्डात्काण्डादिति काण्डात् – काण्डात् । प्ररोहन्तीति प्र–रोहन्ती ।
इति । आह । काण्डेनकाण्डेनेति काण्डेन – काण्डेन । हि । एषा ।
प्रतितिष्ठतीति प्रति – तिष्ठति । एवा । नः । दूर्वे । प्रेति । तनु ।
सहस्रेण । शतेन । च । इति । आह । साहस्रः । प्रजापतिरिति
प्रजा – पतिः । प्रजापतेरिति प्रजा – पतेः । आप्त्यै ।
देवलक्ष्ममिति देव–लक्ष्मम् । वै । त्र्यालिखितेति त्रि – आलिखिता ।
ताम् । उत्तरलक्ष्माणमित्युत्तर – लक्ष्माणम् । देवाः । उपेति ।
अदधत । अधरलक्ष्माणमित्यधर – लक्ष्माणम् । असुराः ।
यम् । **43 (50)**

5.2.8.4

कामयेत वसीयान्थ् स्यादित्युत्तरलक्ष्माणं तस्योप दध्याद्–वसीयानेव
भवति यं कामयेत पापीयान्थ् स्यादित्यधरलक्ष्माणं तस्योप
दध्यादसुरयोनि–मेवैनमनु परा भावयति पापीयान् भवति त्र्यालिखिता

भवतीमे वै लोकास्त्र्यालिखितैभ्य एव लोकेभ्यो भ्रातृव्यमन्तरेत्यङ्गिरसः सुवर्गं ँलोकं ँयतः पुरोडाशः कूर्मो भूत्वाऽनु प्रासर्प– [ ] **44**

5.2.8.4 - Padam

कामयेत । वसीयान् । स्यात् । इति ।

उत्तरलक्ष्माणमित्युत्तर–लक्ष्माणम् । तस्य । उपेति । दध्यात् ।

वसीयान् । एव । भवति । यम् । कामयेत । पापीयान् । स्यात् ।

इति । अधरलक्ष्माणमित्यधर– लक्ष्माणम् । तस्य । उपेति । दध्यात् ।

असुरयोनिमित्यसुर – योनिम् । एव । एनम् । अनु । परेति ।

भावयति । पापीयान् । भवति । त्र्यालिखितेति त्रि – आलिखिता ।

भवति । इमे । वै । लोकाः । त्र्यालिखितेति त्रि – आलिखिता ।

एभ्यः । एव । लोकेभ्यः । भ्रातृव्यम् । अन्तः । एति । अङ्गिरसः ।

सुवर्गमिति सुवः – गम् । लोकम् । यतः । पुरोडाशः । कूर्मः ।

भूत्वा । अनु । प्रेति । असर्पत् । **44 (50)**

5.2.8.5

–द्यत् कूर्ममुपदधाति यथा क्षेत्रविदञ्जसा नयत्येवमेवैनं कूर्मः सुवर्गं ँल्लोकमञ्जसा नयति मेधो वा एष पशूनां ँयत् कूर्मो यत् कूर्ममुप दधाति स्वमेव मेधं पश्यन्तः पशव उप तिष्ठन्ते श्मशानं ँवा एतत् क्रियते यन्मृतानां पशूना७ शीर्.षाण्युपधीयन्ते यज्जीवन्तं कूर्ममुप दधाति तेनाश्मशानचिद्वास्तव्यो वा एष यत् –[ ] **45**

5.2.8.5 - Padam

यत् । कूर्मम् । उपदधातीत्युप – दधाति । यथा । क्षेत्रविदिति क्षेत्र – वित् । अञ्जसा । नयति । एवम् । एव । एनम् । कूर्मः । सुवर्गमिति सुवः – गम् । लोकम् । अञ्जसा । नयति । मेधः । वै । एषः । पशूनाम् । यत् । कूर्मः । यत् । कूर्मम् । उपदधातीत्युप – दधाति । स्वम् । एव । मेधम् । पश्यन्तः । पशवः । उपेति । तिष्ठन्ते । श्मशानम् । वै । एतत् । क्रियते । यत् । मृतानाम् । पशूनाम् । शीर्.षाणि । उपधीयन्त इत्युप – धीयन्ते । यत् । जीवन्तम् । कूर्मम् । उपदधातीत्युप – दधाति । तेन ।

अश्मशानचिदित्यश्मशान – चित् । वास्तव्यः । वै । एषः ।

यत् । **45 (50)**

5.2.8.6

कूर्मो मधु वाता ऋतायत इति दध्ना मधुमिश्रेणाभ्यनक्ति स्वदयत्येवैनं ग्राम्यं ँवा एतदन्नं ँयद्–दध्यारण्यं मधु यद्दध्ना मधुमिश्रेणा भ्यनक्त्युभयस्या ऽवरुद्ध्यै मही द्यौः पृथिवी च न इत्याहा ऽऽभ्यामेवैनमुभयतः परिगृह्णाति प्राञ्चमुप दधाति सुवर्गस्य लोकस्य समष्ट्यै पुरस्तात् प्रत्यञ्चमुप दधाति तस्मात् – [ ] **46**

5.2.8.6 - Padam

कूर्मः । मधु । वाताः । ऋतायत इत्यृत – यते । इति । दध्ना । मधुमिश्रेणेति मधु – मिश्रेण । अभीति । अनक्ति । स्वदयति । एव । एनम् । ग्राम्यम् । वै । एतत् । अन्नम् । यत् । दधि । आरण्यम् । मधु । यत् । दध्ना । मधुमिश्रेणेति मधु – मिश्रेण । अभ्यनक्तीत्यभि – अनक्ति । उभयस्य । अवरुद्ध्या इत्यव – रुद्ध्यै । मही । द्यौः ।

पृथिवी । च । नः । इति । आह । आभ्याम् । एव । एनम् ।
उभयतः । परीति । गृह्णाति । प्राञ्चम् । उपेति । दधाति ।
सुवर्गस्येति सुवः – गस्य । लोकस्य । समष्ट्या इति सं–अष्ट्यै ।
पुरस्तात् । प्रत्यञ्चम् । उपेति । दधाति । तस्मात् । **46 (50)**

5.2.8.7

पुरस्तात् प्रत्यञ्चः पशवो मेधमुप तिष्ठन्ते यो वा अपनाभिमग्निं
चिनुते यजमानस्य नाभिमनु प्रविशति स एनमीश्वरो
हिꣳसितोरुलूखलमुप दधात्येषा वा अग्नेर्नाभिः सनाभिमेवाऽग्निं
चिनुते हिꣳसाया औदुम्बरं भवत्यूर्ग्वा उदुम्बर ऊर्जमेवाव रुन्धे
मध्यत उप दधाति मध्यत एवास्मा ऊर्जं दधाति तस्मान्–( )–मध्यत
ऊर्जा भुञ्जत इयद्–भवति प्रजापतिना यज्ञमुखेन संमितमव
हन्त्यन्नमेवाक–वैष्णव्यर्चोप दधाति विष्णुर्वै यज्ञो वैष्णवा वनस्पतयो
यज्ञ एव यज्ञं प्रतिष्ठापयति । **47**

5.2.8.7 - Padam

पुरस्तात् । प्रत्यञ्चः । पशवः । मेधम् । उपेति । तिष्ठन्ते । यः । वै । अपनाभिमित्यप – नाभिम् । अग्निम् । चिनुते । यजमानस्य । नाभिम् । अनु । प्रेति । विशति । सः । एनम् । ईश्वरः । हिꣳसितोः । उलूखलम् । उपेति । दधाति । एषा । वै । अग्नेः । नाभिः । सनाभिमिति स – नाभिम् । एव । अग्निम् । चिनुते । अहिꣳसायै । औदुंबरम् । भवति । ऊर्क् । वै । उदुंबरः । ऊर्जम् । एव । अवेति । रुन्धे । मध्यतः । उपेति । दधाति । मध्यतः । एव । अस्मै । ऊर्जम् । दधाति । तस्मात् ( ) । मध्यतः । ऊर्जा । भुञ्जते । इयत् । भवति । प्रजापतिनेति प्रजा – पतिना । यज्ञमुखेनेति यज्ञ – मुखेन । सम्मितमिति सं – मितम् । अवेति । हन्ति । अन्नम् । एव । अकः । वैष्णव्या । ऋचा । उपेति । दधाति । विष्णुः । वै । यज्ञः । वैष्णवाः । वनस्पतयः । यज्ञे । एव । यज्ञम् । प्रतीति । स्थापयति । **47 (77)**

(एष वै - पशु - र्य - मंसर्प - देष यत् - तस्मात् - तस्माथ् - सप्तविꣳशतिश्च) (A8)

5.2.9.1

एषां ँवा एतल्लोकानां ज्योतिः सम्भृतं ँयदुखा यदुखा-मुपदधात्येभ्य एव लोकेभ्यो ज्योतिरव रुन्धे मध्यत उप दधाति मध्यत एवास्मै ज्योतिर्दधाति तस्मान्मध्यतो ज्योतिरुपाऽऽस्महे सिकताभिः पूरयत्येतद्वा अग्नेर्वैश्वानरस्य रूपꣳ रूपेणैव वैश्वानरमव रुन्धे यं कामयेत क्षोधुकः स्यादित्यूनां तस्योप- [ ] **48**

5.2.9.1 - Padam

एषाम् । वै । एतत् । लोकानाम् । ज्योतिः । संभृतमिति सं-भृतम् । यत् । उखा । यत् । उखाम् । उपदधातीत्युप-दधाति । एभ्यः । एव । लोकेभ्यः । ज्योतिः । अवेति । रुन्धे । मध्यतः । उपेति । दधाति । मध्यतः । एव । अस्मै । ज्योतिः । दधाति । तस्मात् । मध्यतः । ज्योतिः । उपेति । आस्महे । सिकताभिः । पूरयति । एतत् । वै । अग्नेः । वैश्वानरस्य । रूपम् । रूपेण । एव । वैश्वानरम् । अवेति ।

रुन्धे । यम् । कामयेत । क्षोधुकः । स्यात् । इति । ऊनाम् । तस्य । उपेति । **48 (50)**

5.2.9.2

दध्यात् क्षोधुक एव भवति यं कामयेता-नुपदस्य-दन्नमद्यादिति पूर्णां तस्योप दध्यादनुपदस्य-देवान्नमत्ति सहस्रं ँवै प्रति पुरुषः पशूनां ँयच्छति सहस्रमन्ये पशवो मध्ये पुरुषशीर्.षमुप दधाति सवीर्यत्वायो-खायामपि दधाति प्रतिष्ठामेवैनद्-गमयति व्यृद्धं ँवा एतत् प्राणैरमेध्यं ँयत् पुरुषशीर्.षममृतं खलु वै प्राणा - [ ] **49**

5.2.9.2 - Padam

दध्यात् । क्षोधुकः । एव । भवति । यम् । कामयेत । अनुपदस्यदित्यनुप - दस्यत् । अन्नम् । अद्यात् । इति । पूर्णाम् । तस्य । उपेति । दध्यात् । अनुपदस्यदित्यनुप - दस्यत् । एव । अन्नम् । अत्ति । सहस्रम् । वै । प्रतीति । पुरुषः । पशूनाम् । यच्छति । सहस्रम् । अन्ये । पशवः । मध्ये । पुरुषशीर्.षमिति पुरुष - शीर्.षम् । उपेति । दधाति । सवीर्यत्वायेति

सवीर्य–त्वाय । उखायाम् । अपीति । दधाति । प्रतिष्ठामिति प्रति – स्थाम् । एव । एनत् । गमयति । व्यृद्धमिति वि – ऋद्धम् । वै । एतत् । प्राणैरिति प्र – अनैः । अमेध्यम् । यत् । पुरुषशीर्.षमिति पुरुष – शीर्.षम् । अमृतम् । खलु । वै । प्राणा इति प्र – अनाः ।

49 (50)

5.2.9.3

अमृत९ँ हिरण्यं प्राणेषु हिरण्यशल्कान् प्रत्यस्यति प्रतिष्ठामेवैनद्–गमयित्वा प्राणैः समर्धयति दध्ना मधुमिश्रेण पूरयति मधव्योऽसानीति शृतातङ्क्येन मेध्यत्वाय ग्राम्यं ँवा एतदन्नं ँयद्–दध्यारण्यं मधु यद्दध्ना मधुमिश्रेण पूरयत्युभयस्या–वरुद्ध्यै पशुशीर्.षाण्युप दधाति पशवो वै पशुशीर्.षाणि पशूनेवाव रुन्धे यं कामयेतापशुः स्यादिति–[ ] **50**

5.2.9.3 - Padam

अमृतम् । हिरण्यम् । प्राणेष्विति प्र – अनेषु । हिरण्यशल्कानिति हिरण्य – शल्कान् । प्रतीति । अस्यति । प्रतिष्ठामिति प्रति–स्थाम् । एव । एनत् । गमयित्वा । प्राणैरिति प्र–अनैः । समिति । अर्धयति ।

दध्ना । मधुमिश्रेणेति मधु–मिश्रेण । पूरयति । मधव्यः । असानि ।
इति । शृतातङ्क्येनेति शृत – आतङ्क्येन । मेध्यत्वायेति
मेध्य – त्वाय । ग्राम्यम् । वै । एतत् । अन्नम् । यत् । दधि ।
आरण्यम् । मधु । यत् । दध्ना । मधुमिश्रेणेति मधु – मिश्रेण ।
पूरयति । उभयस्य । अवरुद्ध्या इत्यव – रुद्ध्यै ।
पशुशीर्.षाणीति पशु – शीर्.षाणि । उपेति । दधाति । पशवः । वै ।
पशुशीर्.षाणीति पशु – शीर्.षाणि । पशून् । एव । अवेति । रुन्धे ।
यम् । कामयेत । अपशुः । स्यात् । इति । **50 (50)**

5.2.9.4

विषूचीनानि तस्योप दद्ध्याद्–विषूच एवास्मात् पशून् दधात्यपशुरेव
भवति यं कामयेत पशुमान्थ्–स्यादिति समीचीनानि तस्योप दध्याथ्
समीच एवास्मै पशून् दधाति पशुमानेव भवति पुरस्तात्
प्रतीचीनमश्वस्योप दधाति पश्चात् प्राचीनमृषभस्या–पशवो वा अन्ये

गो अश्वेभ्यः पशवो गो अश्वानेवास्मै समीचो दधात्ये-तावन्तो वै पशवो - [ ] 51

5.2.9.4 - Padam

विषूचीनानि । तस्य । उपेति । दध्यात् । विषूचः । एव । अस्मात् ।
पशून् । दधाति । अपशुः । एव । भवति । यम् । कामयेत ।
पशुमानिति पशु - मान् । स्यात् । इति । समीचीनानि । तस्य ।
उपेति । दध्यात् । समीचः । एव । अस्मै । पशून् । दधाति ।
पशुमानिति पशु - मान् । एव । भवति । पुरस्तात् । प्रतीचीनम् ।
अश्वस्य । उपेति । दधाति । पश्चात् । प्राचीनम् । ऋषभस्य ।
अपशवः । वै । अन्ये । गो अश्वेभ्य इति गो -अश्वेभ्यः । पशवः ।
गो अश्वानिति गो - अश्वान् । एव । अस्मै । समीचः । दधाति ।
एतावन्तः । वै । पशवः । 51 (50)

5.2.9.4

द्विपादश्च चतुष्पादश्च तान् वा एतदग्नौ प्रदधाति यत् पशुशीर्.षाण्युप - दधात्य-मुमारण्यमनु ते दिशामीत्याह ग्राम्येभ्य एव पशुभ्य आरण्यान्

पशूञ्छुचमनूथ्सृजति तस्माथ् समावत् पशूनां प्रजायमानाना-मारण्याः पशवः कनीया॑ऽसः शुचा ह्यृताः सर्पशीर्.षमुप दधाति यैव सर्पे त्विषिस्तामेवाव रुन्धे- [ ] 52

5.2.9.5 - Padam

द्विपाद इति द्वि - पादः । च । चतुष्पाद इति चतुः - पादः । च । तान् । वै । एतत् । अग्नौ । प्रेति । दधाति । यत् । पशुशीर्.षाणीति पशु - शीर्.षाणि । उपदधातीत्युप - दधाति । अमुम् । आरण्यम् । अन्विति । ते । दिशामि । इति । आह । ग्राम्येभ्यः । एव । पशुभ्य इति पशु - भ्यः । आरण्यान् । पशून् । शुचम् । अनू । उदिति । सृजति । तस्मात् । समावत् । पशूनाम् । प्रजायमानानामिति प्र - जायमानानाम् । आरण्याः । पशवः । कनीया॑ऽसः । शुचा । हि । ऋताः । सर्पशीर्.षमिति सर्प - शीर्.षम् । उपेति । दधाति । या । एव । सर्पे । त्विषिः । ताम् । एव । अवेति । रुन्धे । **52 (50)**

5.2.9.5

यथ् समीचीनं पशुशीर्.षैरुप दध्याद् ग्राम्यान् पशून् द७्शुकाः स्युर्यद्–विषूचीन–मारण्यान् यजुरेव वदेदव तां त्विषि७् रुन्धे या सर्पे न ग्राम्यान् पशून् हिनस्ति नाऽऽ*रण्यानथो खलूपधेयमेव यदुपदधाति तेन तां त्विषिमव रुन्धे या सर्पे यद्–यजुर्वदति तेन शान्तं । **53**

5.2.9.6 - Padam

यत् । समीचीनम् । पशुशीर्.षैरिति पशु – शीर्.षैः ।
उपदध्यादित्युप – दध्यात् । ग्राम्यान् । पशून् । द७्शुकाः ।
स्युः । यत् । विषूचीनम् । आरण्यान् । यजुः । एव । वदेत् ।
अवेति । ताम् । त्विषिम् । रुन्धे । या । सर्पे । न । ग्राम्यान् । पशून् ।
हिनस्ति । न । आरण्यान् । अथो इति । खलु ।
उपधेयमित्युप – धेयम् । एव । यत् । उपदधातीत्युप – दधाति ।
तेन । ताम् । त्विषिम् । अवेति । रुन्धे । या । सर्पे । यत् । यजुः ।
वदति । तेन । शान्तम् । **53 (44)**

(ऊनान्तस्योप – प्राणाः – स्यादिति – वै पशवो – रुन्धे – चतुश्चत्वारिꣳशच्च) (A9)

5.2.10.1

पशुर्वा एष यदग्निर्योनिः खलु वा एषा पशोर्वि क्रियते यत् प्राचीनमैष्टकाद्–यजुः क्रियते रेतोऽपस्या अपस्या उप दधाति योनावेव रेतो दधाति पञ्चोप दधाति पाङ्क्ताः पशवः पशूनेवास्मै प्रजनयति पञ्च दक्षिणतो वज्रो वा अपस्या वज्रेणैव यज्ञस्य दक्षिणतो रक्षाꣳस्यप हन्ति पञ्च पश्चात् – [ ] 54

5.2.10.1 - Padam

पशुः । वै । एषः । यत् । अग्निः । योनिः । खलु । वै । एषा । पशोः । वीति । क्रियते । यत् । प्राचीनम् । ऐष्टकात् । यजुः । क्रियते । रेतः । अपस्याः । अपस्याः । उपेति । दधाति । योनौ । एव । रेतः । दधाति । पञ्च । उपेति । दधाति । पाङ्क्ताः । पशवः । पशून् । एव । अस्मै । प्रेति । जनयति । पञ्च । दक्षिणतः । वज्रः । वै । अपस्याः । वज्रेण । एव । यज्ञस्य । दक्षिणतः । रक्षाꣳसि ।

अपेति । हन्ति । पञ्च । पश्चात् । **54 (50)**

5.2.10.2

प्राचीरुप दधाति पश्चाद्वै प्राचीन९ँ रेतो धीयते पश्चादेवास्मै प्राचीन९ँ रेतो दधाति पञ्च पुरस्तात् प्रतीचीरुप दधाति पञ्च पश्चात् प्राचीस्तस्मात् प्राचीन९ँ रेतो धीयते प्रतीचीः प्रजा जायन्ते पञ्चोत्तरतः छन्दस्याः पशवो वै छन्दस्याः पशूनेव प्रजातान्थ् स्वमायतनमभि पर्यूहत इयं ँवा अग्ने-रतिदाहादबिभेथ् सैता-[ ]**55**

5.2.10.2 - Padam

प्राचीः । उपेति । दधाति । पश्चात् । वै । प्राचीनम् । रेतः । धीयते । पश्चात् । एव । अस्मै । प्राचीनम् । रेतः । दधाति । पञ्च । पुरस्तात् । प्रतीचीः । उपेति । दधाति । पञ्च । पश्चात् । प्राचीः । तस्मात् । प्राचीनम् । रेतः । धीयते । प्रतीचीः । प्रजा इति प्र-जाः । जायन्ते । पञ्च । उत्तरत इत्युत् - तरतः । छन्दस्याः । पशवः । वै । छन्दस्याः । पशून् । एव । प्रजातानिति प्र - जातान् । स्वम् । आयतनमित्या - यतनम् । अभि । परीति । ऊहते । इयम् । वै ।

अग्नेः । अतिदाहादित्यति - दाहात् । अबिभेत् । सा ।

एताः । **55 (50)**

5.2.10.3

अपस्या अपश्यत् ता उपाधत्त ततो वा इमां नात्यदहद्-यदपस्या

उपदधात्यस्या अनतिदाहायोवाच हेयमददित् स ब्रह्मणाऽन्नं ँयस्यैता

उपधीयान्तै य उ चैना एवँवेद प्राणभृत उप दधाति रेतस्येव

प्राणान् दधाति तस्माद्-वदन् प्राणन् पश्यञ्छृण्वन् पशुर्जायते ऽयं

पुरो - [ ] **56**

5.2.10.3 - Padam

अपस्याः । अपश्यत् । ताः । उपेति । अधत्त । ततः । वै । इमाम् ।

न । अतीति । अदहत् । यत् । अपस्याः । उपदधातीत्युप - दधाति ।

अस्याः । अनतिदाहायेत्यनति - दाहाय । उवाच । ह । इयम् ।

अदत् । इत् । सः । ब्रह्मणा । अन्नम् । यस्य । एताः ।

उपधीयान्ता इत्युप - धीयान्तै । यः । उ । च । एनाः । एवम् ।

वेदत् । इति । प्राणभृत इति प्राण-भृतः । उपेति । दधाति । रेतसि ।

एव । प्राणानिति प्र – अनान् । दधाति । तस्मात् । वदन्न् ।

प्राणन्निति प्र – अनन्न् । पश्यन्न् । शृण्वन्न् । पशुः । जायते ।

अयम् । पुरः । **56 (50)**

5.2.10.4

भुव इति पुरस्तादुप दधाति प्राणमेवैताभि–र्दाधाराऽयं दक्षिणा

विश्वकर्मेति दक्षिणतो मन एवैताभिर्दाधारायं पश्चाद्–विश्वव्यचा इति

पश्चा–च्चक्षुरेवैताभि–र्दाधारेद–मुत्तराथ् सुवरित्युत्तरतः

श्रोत्रमेवैताभि–र्दाधारेयमुपरि मतिरित्युपरिष्टाद्–वाचमेवैताभि–र्दाधार

दशदशोप दधाति सवीर्यत्वायाक्ष्णयो– [ ] **57**

5.2.10.4 - Padam

भुवः । इति । पुरस्तात् । उपेति । दधाति । प्राणमिति प्र – अनम् ।

एव । एताभिः । दाधार । अयम् । दक्षिणा ।

विश्वकर्मेति विश्व–कर्मा । इति । दक्षिणतः । मनः । एव । एताभिः ।

दाधार । अयम् । पश्चात् । विश्वव्यचा इति विश्व – व्यचाः ।

इति । पश्चात् । चक्षुः । एव । एताभिः । दाधार । इदम् ।

उत्तरादित्युत् - तरात् । सुवः । इति । उत्तरत इत्युत् - तरतः ।
श्रोत्रम् । एव । एताभिः । दाधार । इयम् । उपरि । मतिः । इति ।
उपरिष्टात् । वाचम् । एव । एताभिः । दाधार । दशदशेति दश-दश ।
उपेति । दधाति । सवीर्यत्वायेति सवीर्य-त्वाय । अक्ष्णया । **57 (50)**

5.2.10.5

-प दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्रहरन्ति प्रतिष्ठित्यै याः
प्राचीस्ताभि-र्वसिष्ठ आर्ध्नोद्या दक्षिणा ताभिर्भरद्वाजो याः
प्रतीचीस्ताभि-र्विश्वामित्रो या उदीचीस्ताभि-र्जमदग्निर्या ऊर्ध्वास्ताभि-
र्विश्वकर्मा य एवमेतासामृद्धिं ँवेदर्ध्नोत्येव य आसामेवं बन्धुतां ँवेद
बन्धुमान् भवति य आसामेवं क्लृप्तिं ँवेद कल्पते- [ ] **58**

5.2.10.5 - Padam

उपेति । दधाति । तस्मात् । अक्ष्णया । पशवः । अङ्गानि । प्रेति ।
हरन्ति । प्रतिष्ठित्या इति प्रति - स्थित्यै । याः । प्राचीः । ताभिः ।
वसिष्ठः । आर्ध्नोत् । याः । दक्षिणा । ताभिः । भरद्वाजः । याः ।
प्रतीचीः । ताभिः । विश्वामित्र इति विश्व - मित्रः । याः । उदीचीः ।

ताभिः । जमदग्निः । याः । ऊर्ध्वाः । ताभिः । विश्वकर्मेति विश्व – कर्मा । यः । एवम् । एतासाम् । ऋद्धिम् । वेद । ऋध्नोति । एव । यः । आसाम् । एवम् । बन्धुताम् । वेद । बन्धुमानिति बन्धु – मान् । भवति । यः । आसाम् । एवम् । क्लृप्तिम् । वेद । कल्पते । **58 (50)**

<u>5.2.10.6</u>

ऽस्मै य आसामेवमायतनं ँवेदाऽऽ*यतनवान् भवति य आसामेवं प्रतिष्ठां ँवेद प्रत्येव तिष्ठति प्राणभृत उपधाय सँयत उप दधाति प्राणानेवा ऽस्मिन् धित्वा सँयद्भिः सँयच्छति तथ् सँयता॑ सँयत्त्वमथो प्राण एवापानं दधाति तस्मात् प्राणापानौ सं चरतो विषूचीरुप दधाति तस्माद्–विष्वञ्चौ प्राणापानौ यद्वा अग्नेरसँयत– [ ] **59**

<u>5.2.10.6 - Padam</u>

अस्मै । यः । आसाम् । एवम् । आयतनमित्या – यतनम् । वेद । आयतनवानित्यायतन – वान् । भवति । यः । आसाम् । एवम् ।

प्रतिष्ठामिति प्रति – स्थाम् । वेद । प्रतीति । एव । तिष्ठति । प्राणभृत इति प्राण – भृतः । उपधायेत्युप – धाय । सँयत इति सं – यतः । उपेति । दधाति । प्राणानिति प्र – अनान् । एव । अस्मिन्न् । धित्वा । सँयद्भिरिति सँयत् – भिः । समिति । यच्छति । तत् । सँयतामिति सं – यताम् । सँयत्त्वमिति सँयत् – त्वम् । अथो इति । प्राण इति प्र – अने । एव । अपानमित्यप – अनम् । दधाति । तस्मात् । प्राणापानाविति प्राण–अपानौ । समिति । चरतः । विषूचीः । उपेति । दधाति । तस्मात् । विष्वञ्चौ । प्राणापानाविति प्राण–अपानौ । यत् । वै । अग्नेः । असँयतमित्यसं – यतम् । **59 (50)**

5.2.10.7

–मसुवर्ग्यमस्य तथ् सुवर्ग्योऽग्निर्यथ् सँयत उप दधाति समेवैनं सँयच्छति सुवर्ग्यमेवाक–स्त्र्यविर्वयः कृतमयानामित्याह वयोभिरेवायानव रुन्धे ऽयैर्वया॒ँसि सर्वतो वायुमतीर्भवन्ति तस्मादय॒ँ सर्वतः पवते । **60**

5.2.10.7 - Padam

असुवर्ग्यमित्यसुवः – ग्यम् । अस्य । तत् । सुवर्ग्य इति सुवः – ग्यः । अग्निः । यत् । सँयत इति सं – यतः । उपदधातीत्युप – दधाति । समिति । एव । एनम् । यच्छति । सुवर्ग्यमिति सुवः – ग्यम् । एव । अकः । त्र्यविरिति त्रि – अविः । वयः । कृतम् । अयानाम् । इति । आह । वयोभिरिति वयः – भिः । एव । अयान् । अवेति । रुन्धे । अयैः । वया॒ꣳसि । सर्वतः । वायुमतीरिति वायु – मतीः । भवन्ति । तस्मात् । अयम् । सर्वतः । पवते । **60 (35)** *(पश्चा – देताः – पुरो – ऽक्ष्णया – कल्पते – ऽसं यँतं – पञ्चत्रि॒ꣳशच्च) (A10)*

5.2.11.1

गायत्री त्रिष्टुब् जगत्यनुष्टुप् पङ्क्त्या सह ।
बृहत्युष्णिहा ककुथ् सूचीभिः शिम्यन्तु त्वा ।
द्विपदा या चतुष्पदा त्रिपदा याच षट्पदा ।
सछन्दा या च विच्छन्दाः सूचीभिः शिम्यन्तु त्वा ।

महानाम्नी रेवतयो विश्वा आशाः प्रसूवरीः ।
मेघ्या विद्युतो वाचः सूचीभिः शिम्यन्तु त्वा ।
रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः ।
अश्वस्य वाजिनस्त्वचि सूचीभिः शिम्यन्तु त्वा । नारी– [ ] **61**

5.2.11.1 - Padam

गायत्री । त्रिष्टुप् । जगती । अनुष्टुगित्यनु–स्तुक् । पङ्क्त्या । सह । बृहती । उष्णिहा । ककुत् । सूचीभिः । शिम्यन्तु । त्वा । द्विपदेति द्वि – पदा । या । चतुष्पदेति चतुः – पदा । त्रिपदेति त्रि – पदा । या । च । षट्पदेति षट् – पदा । सछन्दा इति स – छन्दाः । या । च । विच्छन्दा इति वि – छन्दाः । सूचीभिः । शिम्यन्तु । त्वा । महानाम्नीरिति महा – नाम्नीः । रेवतयः । विश्वाः । आशाः । प्रसूवरीरिति प्र – सूवरीः । मेघ्याः । विद्युत इति वि – द्युतः । वाचः । सूचीभिः । शिम्यन्तु । त्वा । रजताः । हरिणीः । सीसाः । युजः । युज्यन्ते । कर्मभिरिति कर्म – भिः । अश्वस्य । वाजिनः ।

त्वचि । सूचीभिः । शिम्यन्तु । त्वा । नारीः । **61 (50)**

5.2.11.2

-स्ते पत्नयो लोम विचिन्वन्तु मनीषया ।

देवानां पत्नीर्दिशः सूचीभिः शिम्यन्तु त्वा ।

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।

इहेहैषां कृणुत भोजनानि ये बर्.हिषो नमोवृक्तिं नजग्मुः । **62**

5.2.11.2 - Padam

ते । पत्नयः । लोम । वीति । चिन्वन्तु । मनीषया । दोवानाम् ।

पत्नीः । दिशः । सूचीभिः । शिम्यन्तु । त्वा । कुवित् । अङ्ग ।

यवमन्त इति यव - मन्तः । यवम् । चित् । यथा । दान्ति ।

अनुपूर्वमित्यनु - पूर्वम् । वियूयेति वि - यूय ।

इहेहेतीह - इह । एषाम् । कृणुत । भोजनानि । ये । बर्.हिषः ।

नमोवृक्तिमिति नमः - वृक्तिम् । न । जग्मुः । **62 (30)**

(नारी - स्त्रि॒ शच्च) (A11)

5.2.12.1

कस्त्वा च्छयति कस्त्वा वि शास्ति कस्ते गात्राणि शिम्यति ।

क उ ते शमिता कविः । ऋतवस्त ऋतुधा परुः शमितारो विशासतु ।

सँवथ्सरस्य धायसा शिमीभिः शिम्यन्तु त्वा ।

दैव्या अध्वर्यवस्त्वा च्छयन्तु वि च शासतु ।

गात्राणि पर्वशस्ते शिमाः कृण्वन्तु शिम्यन्तः ।

अर्धमासाः परूꣳषि ते मासाः छयन्तु शिम्यन्तः ।

अहोरात्राणि मरुतो विलिष्टꣳ – [ ] **63**

5.2.12.1 - Padam

कः । त्वा । छ्यति । कः । त्वा । वीति । शास्ति । कः । ते ।

गात्राणि । शिम्यति । कः । उ । ते । शमिता । कविः । ऋतवः । ते ।

ऋतुधेत्यृतु – धा । परुः । शमितारः । वीति । शासतु ।

सँवथ्सरस्येति सं – वथ्सरस्य । धायसा । शिमीभिः । शिम्यन्तु ।

त्वा । दैव्याः । अध्वर्यवः । त्वा । छ्यन्तु । वीति । च । शासतु ।

गात्राणि । पर्वश इति पर्व – शः । ते । शिमाः । कृण्वन्तु ।

शिम्यन्तः । अर्धमासा इत्यर्ध – मासाः । परूꣳषि । ते । मासाः ।
छ्यन्तु । शिम्यन्तः । अहोरात्राणीत्यहः – रात्राणि । मरुतः ।
विलिष्टमिति वि – लिष्टम् । **63 (50)**

5.2.12.2

सूदयन्तु ते । पृथिवी ते ऽन्तरिक्षेण वायुश्छिद्रं भिषज्यतु ।
द्यौस्ते नक्षत्रैः सह रूपं कृणोतु साधुया ।
शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः ।
शमस्थभ्यो मज्जभ्यः शमु ते तनुवे भुवत् । **64**

5.2.12.2 - Padam

सूदयन्तु । ते । पृथिवी । ते । अन्तरिक्षेण । वायुः । छिद्रम् ।
भिषज्यतु । द्यौः । ते । नक्षत्रैः । सह । रूपम् । कृणोतु । साधुया ।
शम् । ते । परेभ्यः । गात्रेभ्यः । शम् । अस्तु । अवरेभ्यः । शम् ।
अस्थभ्य इत्यस्थ – भ्यः । मज्जभ्य इति मज्ज – भ्यः । शम् । उ ।
ते । तनुवे । भुवत् । **64 (30)** *(विलिष्टं – त्रिꣳशच्च) (A12)*

Prasna Korvai with starting Padams of 1 to 12 Anuvaakams :-
(विष्णुमुखा – अन्नपते – यावती – वि वै – पुरुषमात्रेणा – ऽग्ने तव श्रवो वयो – ब्रह्म जज्ञान७ – स्वयमातृण्णा – मेषां ँवै – पशु – गायत्री – कस्त्वा – द्वादश)

Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-
(विष्णुमुखा – अपचितिमान् – वि वा एता – वग्ने तव – स्वयमातृण्णां – ँविषूचीनानि – गायत्री – चतुष्षष्टिः)

First and Last Padam of Second Prasnam of 5th Kandam
(विष्णुमुखा – स्तनुवे भुवत्)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

पञ्चमकाण्डे द्वितीयः प्रश्नः समाप्तः ॥

Details of Panchati and Padam for Kandam 5 – Prasanam 2 – TS 5.2

	Panchati	Padams
Anuvakam 1	7	342
Anuvakam 2	6	292
Anuvakam 3	7	347
Anuvakam 4	4	198
Anuvakam 5	6	325
Anuvakam 6	5	270
Anuvakam 7	5	255
Anuvakam 8	7	377
Anuvakam 9	6	294
Anuvakam 10	7	335
Anuvakam 11	2	80
Anuvakam 12	2	80
Total →	64	3195

Notes:

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**